ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यकम्

## प्रपाठकः 7 - 8

# Table of Contents

7 कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यके प्रथमः प्रपाठकः ...................... 7

7.1 सप्तमः प्रपाठकः ........................................................................ 7

अनुवाकं–1 ........................................................................ 7

अनुवाकं–2 ........................................................................ 8

अनुवाकं–3 ........................................................................ 10

अनुवाकं–4 ........................................................................ 12

अनुवाकं–5 ........................................................................ 12

अनुवाकं–6 ........................................................................ 15

अनुवाकं–7 ........................................................................ 17

अनुवाकं–8 ........................................................................ 19

अनुवाकं–9 ........................................................................ 20

अनुवाकं–10 ........................................................................ 22

अनुवाकं–11 ........................................................................ 24

अनुवाकं–12 ........................................................................ 27

अनुवाकं–13 ........................................................................ 28

अनुवाकं–14 ........................................................................ 28

अनुवाकं–15 ........................................................................ 28

अनुवाकं–16 ...................................................................29
अनुवाकं–17 ...................................................................29
अनुवाकं–18 ...................................................................30
अनुवाकं–19 ...................................................................30
अनुवाकं–20................................................................... 31
अनुवाकं–21 ...................................................................32
अनुवाकं–22...................................................................33
अनुवाकं–23...................................................................33
अनुवाकं–24...................................................................34
अनुवाकं–25...................................................................34
अनुवाकं–26...................................................................34
अनुवाकं–27...................................................................34
अनुवाकं–28...................................................................35
अनुवाकं–29...................................................................35
अनुवाकं–30...................................................................36
अनुवाकं–31 ...................................................................36
अनुवाकं–32...................................................................36
अनुवाकं–33...................................................................36

अनुवाकं–34 ........................................ 37
अनुवाकं–35 ........................................ 37
अनुवाकं–36 ........................................ 37
अनुवाकं–37 ........................................ 38
अनुवाकं–38 ........................................ 38
अनुवाकं–39 ........................................ 38
अनुवाकं–40 ........................................ 39
अनुवाकं–41 ........................................ 39
अनुवाकं–42 ........................................ 42
**Appendix (of expansions) ........................................ 50**
8 कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यके अष्टमः प्रपाठकः ........................................ **55**
8.1 अष्टमः प्रपाठकः ........................................ 55
अनुवाकम् – 1 ........................................ 55
अनुवाकम् – 2 ........................................ 58
अनुवाकम् – 3 ........................................ 64
अनुवाकम् – 4 ........................................ 68
अनुवाकम् – 5 ........................................ 74
अनुवाकम् – 6 ........................................ 76

अनुवाकम् – 7 .................................................................... 81
अनुवाकम् – 8 ....................................................................88
अनुवाकम् – 9 ....................................................................94
अनुवाकम् – 10.................................................................100
अनुवाकम् – 11.................................................................103
अनुवाकम् – 12.................................................................105

=================================

# Version Notes

**1st Version Number 0.0 dated 29th January 2018**

**2nd and Current Version Number 1.0 dated 31st March 2020**

1. This Version replaces earlier version “0.0” dated 29th January 2018.

2. We have marked ‘||” (double ruk) at the end of vedic statements based on the book released under “Anandashram Series on TaittirIya Brahmanam containing bashya of Scholar Sayanacharya, 3d Edition published in 1979.

3. We have standardised some of the conventions and formatted this compilation to make reading easier.

We have/shall include Paata Bhedams in brackets wherever found applicable to the best of our efforts.

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

# 7 कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यके प्रथमः प्रपाठकः

## 7.1 सप्तमः प्रपाठकः

अनुवाकं–1

**T.A.7.1.1**

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्माऽहमृषीन् मन्त्रकृतो मन्त्रपतीन् परादां वैँश्वदेवीं वाँचमुद्यासꣳ शिवामदस्ताम् जुष्टाम् देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदम् जगत् ।

शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती ॥

भूतं वँदिष्ये भुवनं वँदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वँदिष्ये तस्मा अहमिद–मुपस्तरण–मुपस्तृण उपस्तरणम् मे प्रजायै पशूनाम् भूया–दुपस्तरणमहम् प्रजायै

पशूनाम् भूयासम् प्राणापानौ मृत्योर्मा पातम् प्राणापानौ मा मा

हासिष्टम् मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि

मधुमतीम् देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्याम्

मनुष्येभ्यस्तम् मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ओम् शान्तिः शान्तिः शान्तिः ॥ **1(4)** *(A1)*

<u>अनुवाकं–2</u>

**<u>T.A.7.2.1</u>**

युञ्जते मन उत युञ्जते धियः । विप्रा विप्रस्य बृहतो विपश्चितः ।

वि होत्रा दधे वयुनाविदेक इत् । मही देवस्य सवितुः परिष्टुतिः ॥

देवस्य त्वा सवितुः प्रसवे । अश्विनोर् बाहुभ्याम् ।

पूष्णो हस्ताभ्यामाददे ॥ अभ्रिरसि नारिरसि ।

अद्ध्वरकृद्–देवेभ्यः । उत्तिष्ठ ब्रह्मणस्पते । **2 (10)**

**<u>T.A.7.2.2</u>**

देवयन्तस्त्वेमहे । उप प्रयन्तु मरुतः सुदानवः ।

इन्द्र प्राशूर्भवा सचा ॥ प्रैतु ब्रह्मणस्पतिः । प्र देव्येतु सूनृता ।

अच्छा वीरन्नर्यम् पङ्क्तिराधसम् । देवा यज्ञन्नयन्तु नः ॥

दे॒वी द्या॑वापृथि॒वी॒ अ॒नु मे म॑ꣳसाथाम् ।

ऋ॒द्ध्यास॑म॒द्य । म॒ख॒स्य॒ शिरः॑ ॥ **3 (10)**

**T.A.7.2.3**

म॒खाय॑ त्वा । म॒खस्य॑ त्वा शी॒र्ष्णे ॥ इ॒यत्य॑ग्र आसीः ।

ऋ॒द्ध्यास॑म॒द्य । म॒ख॒स्य॒ शिरः॑ । म॒खाय॑ त्वा । म॒खस्य॑ त्वा शी॒र्ष्णे ॥

दे॒वीर् वम्री॒रस्य भू॒तस्य॑ प्रथमजा ऋतावरीः ॥

ऋ॒द्ध्यास॑म॒द्य । म॒ख॒स्य॒ शिरः॑ । **4 (10)**

**T.A.7.2.4**

म॒खाय॑ त्वा । म॒खस्य॑ त्वा शी॒र्ष्णे ॥ इ॒न्द्रस्यौजो॑ऽसि ।

ऋ॒द्ध्यास॑म॒द्य । म॒ख॒स्य॒ शिरः॑ । म॒खाय॑ त्वा । म॒खस्य॑ त्वा शी॒र्ष्णे ॥

अ॒ग्नि॒जा अ॑सि प्र॒जाप॑ते॒ रेतः॑ । ऋ॒द्ध्यास॑म॒द्य ।

म॒ख॒स्य॒ शिरः॑ । **5 (10)**

**T.A.7.2.5**

म॒खाय॑ त्वा । म॒खस्य॑ त्वा शी॒र्ष्णे ॥ आयु॑र् धेहि प्रा॒णम् धे॑हि ।

अ॒पा॒नम् धे॑हि व्या॒नम् धे॑हि । चक्षु॑र् धेहि॒ श्रोत्रं॑ धेहि ।

मनो॑ धेहि॒ वाचं॑ धेहि । आ॒त्मानं॑ धेहि प्रति॒ष्ठां धे॑हि ।

मां धेहि मयि धेहि ॥ मधु त्वा मधुला करोतु ।

मखस्य शिरोऽसि ( ) । **6 (10)**

**T.A.7.2.6**

यज्ञस्य पदे स्थः । गायत्रेण त्वा छन्दसा करोमि ।

त्रैष्टुभेन त्वा छन्दसा करोमि । जागतेन त्वा छन्दसा करोमि ॥

मखस्य रास्नाऽसि । अदितिस्ते बिलङ्गृह्णातु । पाङ्क्तेन छन्दसा ।

सूर्यस्य हरसा श्राय । मखोऽसि ॥ **7 (9)**

*(पते – शिर – ऋतावरीर् ऋद्ध्यासमद्य मखस्य शिरः – शिरः – शिरोऽसि – +नव च) (A2)*

**Special Korvai**

(इयति देवीरिन्द्रस्यौजोऽस्यग्निजा अस्यायुर्द्धेहि प्राणम् पञ्च)

अनुवाकं–3

**T.A.7.3.1**

वृष्णो अश्वस्य निष्पदसि । वरुणस्त्वा धृतव्रत आधूपयतु ।

मित्रावरुणयोर् ध्रुवेण धर्मणा ॥ अर्चिषे त्वा । शोचिषे त्वा ।

ज्योतिषे त्वा । तपसे त्वा ॥ अभीमम् महिना दिवम् ।

मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीम् । **8 (10)**

**T.A.7.3.2**

मित्रस्य चर्.षणीधृतः । श्रवो देवस्य सानसिम् ।

द्युम्नञ्चित्रश्रवस्तमम् ॥ सिद्ध्यै त्वा । देवस्त्वा सवितोद्वपतु ।

सुपाणिः स्वङ्गुरिः । सुबाहुरुत शक्त्या ॥ अपद्यमानः पृथिव्याम् ।

आशा दिश आ पृण । उत्तिष्ठ बृहन् भव । **9 (10)**

**T.A.7.3.3**

ऊद्ध्र्वस्तिष्ठ ध्रुवस्त्वम् ॥ सूर्यस्य त्वा चक्षुषाऽन्वीक्षे ।

ऋजवे त्वा । साधवे त्वा । सुक्षित्यै त्वा भूत्यै त्वा ॥

इदमहममुमामुष्यायणं ँविशा पशुभिर् ब्रह्मवर्चसेन पर्यूहामि ।

गायत्रेण त्वा छन्दसा ऽऽच्छृणद्मि । त्रैष्टुभेन त्वा छन्दसा ऽऽच्छृणद्मि ।

जागतेन त्वा छन्दसा ऽऽच्छृणद्मि । छृणत्तु त्वा वाक् ( ) ।

छृणत्तु त्वोर्क् । छृणत्तु त्वा हविः ।

छृन्धि वाचम् । छृन्ध्यूर्जम् । छृन्धि हविः ॥

देव पुरश्चर सघ्यासन्त्वा ॥ **10 (16)**

*(पृथिवीम् – भव – वाख् षट्च) (A3)*

अनुवाकं–4

**T.A.7.4.1**

ब्रह्मन् प्रवर्ग्येण प्रचरिष्यामः । होतर् घर्ममभिष्टुहि ।

अग्नीद्रौहिणौ पुरोडाशावधिश्रय । प्रतिप्रस्थातर्विहर ।

प्रस्तोतः सामानि गाय ॥ यजुर्युक्तं सामभिराक्तखन्त्वा ।

विश्वैर् देवैरनुमतम् मरुद्भिः । दक्षिणाभिः प्रततम् पारयिष्णुम् ।

स्तुभो वहन्तु सुमनस्यमानम् ।

स नो रुचन्धेह्यहृणीयमानः ( ) । भूर्भुवस्सुवः ।

ओमिन्द्रवन्तः प्रचरत ॥ **11 (12)** ***(अहृणीयमानो द्वे च) (A4)***

अनुवाकं–5

**T.A.7.5.1**

ब्रह्मन् प्रचरिष्यामः । होतर् घर्ममभिष्टुहि ॥ यमाय त्वा मखाय त्वा ।

सूर्यस्य हरसे त्वा ॥ प्राणाय स्वाहा व्यानाय स्वाहा ऽपानाय स्वाहा ।

चक्षुषे स्वाहा श्रोत्राय स्वाहा । मनसे स्वाहा वाचे सरस्वत्यै स्वाहा ।

दक्षाय स्वाहा क्रतवे स्वाहा । ओजसे स्वाहा बलाय स्वाहा ॥

देवस्त्वा सविता मद्ध्वाऽनक्तु । **12 (10)**

**T.A.7.5.2**

पृथिवीं तपसस्त्रायस्व । अर्चिरसि शोचिरसि ज्योतिरसि तपोऽसि ।

सꣳसीदस्व महाꣳ असि । शोचस्व देववीतमः ।

वि धूममग्ने अरुषम् मियेद्ध्य । सृज प्रशस्त दर्.शतम् ॥

अञ्जन्ति यम् प्रथयन्तो न विप्राः । वपावन्तन्नाग्निना तपन्तः ।

पितुर्न पुत्र उपसि प्रेष्ठः । आ घर्मो अग्निमृतयन्नसादीत् ॥ **13 (10)**

**T.A.7.5.3**

अनाधृष्या पुरस्तात् । अग्नेराधिपत्ये । आयुर्मे दाः ।

पुत्रवती दक्षिणतः । इन्द्रस्याधिपत्ये । प्रजाम् मे दाः ।

सुषदा पश्चात् । देवस्य सवितुराधिपत्ये । प्राणम् मे दाः ।

आश्रुतिरुत्तरतः । **14 (10)**

**T.A.7.5.4**

मित्रावरुणयोराधिपत्ये । श्रोत्रम् मे दाः । विधृतिरुपरिष्टात् ।

बृहस्पतेराधिपत्ये । ब्रह्म मे दाः क्षत्रम् मे दाः ।

तेजो मे धा वर्चो मे धाः । यशो मे धा स्तपो मे धाः ।

मनो मे धाः ॥ मनोरश्वाऽसि भूरिपुत्रा ।

विश्वाभ्यो मा नाष्ट्राभ्यः पाहि । **15 (10)**

**T.A.7.5.5**

सूपसदा मे भूया मा मा हि॑ꣳसीः ॥ तपो ष्वग्ने अन्तराꣳ अमित्रान् ।

तपाशꣳसमररुषः परस्य । तपा वसो चिकितानो अचित्तान् ।

वि ते तिष्ठन्तामजरा अयासः ॥ चितः स्थ परिचितः ।

स्वाहा मरुद्भिः परिश्रयस्व । मा असि । प्रमा असि ।

प्रतिमा असि । **16 (10)**

**T.A.7.5.6**

सम्मा असि । विमा असि । उन्मा असि । अन्तरिक्षस्यान्तर्द्धिरसि ॥

दिवन्तपसस्त्रायस्व । आभिर् गीर्भिर् यदतो न ऊनम् ।

आप्यायय हरिवो वर्द्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि ।

भूयिष्ठभाजो अध ते स्याम ॥

शुक्रन्ते अन्यद् यजतन्ते अन्यत् । **17 (10)**

**T.A.7.5.7**

विषुरूपे अहनी द्यौरिवासि । विश्वा हि माया अवसि स्वधावः ।
भद्रा ते पूषन्निह रातिरस्तु ॥ अर्.हन् बिभर्.षि सायकानि धन्व ।
अर्.हन्निष्कं यजतं विश्वरूपम् । अर्.हन्निदं दयसे विश्व–मब्भुवम् ।
न वा ओजीयो रुद्र त्वदस्ति ॥ गायत्रमसि । त्रैष्टुभमसि ।
जागतमसि ( ) । मधु मधु मधु ॥ **18 (11)**

*(अन – क्त्वसादी – दुत्तरतः – पाहि – प्रतिमा असि – यजतन्त्वे अन्यज् – जागतमस्येकं च) (A5)*

अनुवाकं–6

**T.A.7.6.1**

दश प्राचीर्दश भासि दक्षिणा । दश प्रतीचीर्दश भास्युदीचीः ।
दशोद्ध्वा भासि सुमनस्यमानः । स नो रुचन्धेह्यहृणीयमानः ॥
अग्निष्ट्वा वसुभिः पुरस्ताद्–रोचयतु गायत्रेण छन्दसा ।
स मा रुचितो रोचय ॥
इन्द्रस्त्वा रुद्रैर्–दक्षिणतो रोचयतु त्रैष्टुभेन छन्दसा ।
स मा रुचितो रोचय ।

वरुणस्त्वाऽऽदित्यैः पश्चाद्–रोचयतु जागतेन छन्दसा ।

स मा रुचितो रोचय । **19 (10)**

**T.A.7.6.2**

द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसा ।

स मा रुचितो रोचय ।

बृहस्पतिस्त्वा विश्वैर् देवैरुपरिष्टाद्–रोचयतु पाङ्क्तेन छन्दसा ।

स मा रुचितो रोचय ॥ रोचितस्त्वम् देव घर्म देवेष्वसि ।

रोचिषीयाहम् मनुष्येषु ॥

सम्राड् घर्म रुचितस्त्वं देवेष्वायुष्मा॑ꣳस्तेजस्वी ब्रह्मवर्चस्यसि ।

रुचितोऽहम् मनुष्येष्वायुष्मा॑ꣳ–स्तेजस्वी ब्रह्मवर्चसी भूयासम् ॥

रुगसि । रुचम् मयि धेहि ( ) । **20 (10)**

**T.A.7.6.3**

मयि रुक् ॥ दश पुरस्ताद्–रोचसे । दश दक्षिणा । दश प्रत्यङ्ङ् ।

दशोदङ्ङ् । दशोद्ध्वो भासि सुमनस्यमानः ।

स नः सम्राडिषमूर्जम् धेहि । वाजी वाजिने पवस्व ।

रोचितो घर्मो रुचीय ॥ **21 (9)** *(रोचय – धेहि – +नव च) (A6)*

अनुवाकं–7

**T.A.7.7.1**

अपश्यङ्गोपामनिपद्यमानम् । आ च परा च पथिभिश्चरन्तम् ।

स सद्ध्रीचीः स विषूचीर्वसानः । आ वरीवर्ति भुवनेष्वन्तः ॥

अत्र प्रावीः । मधु माद्ध्वीभ्याम् मधु माधूचीभ्याम् ।

अनु वाम् देववीतये ॥ समग्निरग्निना गत । सम् देवेन सवित्रा ।

सꣳ सूर्येण रोचते ॥ **22 (10)**

**T.A.7.7.2**

स्वाहा समग्निस्तपसा गत । सम् देवेन सवित्रा ।

सꣳ सूर्येणारोचिष्ट ॥ धर्ता दिवो विभासि रजसः । पृथिव्या धर्ता ।

उरोरन्तरिक्षस्य धर्ता । धर्ता देवो देवानाम् । अमर्त्यस्तपोजाः ॥

हृदे त्वा मनसे त्वा । दिवे त्वा सूर्याय त्वा । **23 (10)**

**T.A.7.7.3**

ऊद्र्ध्वमिम–मद्ध्वरङ्कृधि । दिवि देवेषु होत्रा यच्छ ॥

विश्वासाम् भुवाम् पते । विश्वस्य भुवनस्पते । विश्वस्य मनसस्पते ।

विश्वस्य वचसस्पते । विश्वस्य तपसस्पते । विश्वस्य ब्रह्मणस्पते ।

देवश्रूस्त्वन्देव घर्म देवान् पाहि ॥

तपोजां ँवाचमस्मे नियच्छ देवायुवम् ॥ **24 (10)**

**T.A.7.7.4**

गर्भो देवानाम् ॥ पिता मतीनाम् ॥

पतिः प्रजानाम् ॥ मतिः कवीनाम् ॥

सन्देवो देवेन सवित्राऽयतिष्ट । स৺ सूर्येणारुक्त ॥

आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असि ॥

पिता नोऽसि पिता नो बोध ॥ आयुर्धास्तनूधाः पयोधाः ।

वर्चोदा वरिवोदा द्रविणोदाः । **25 (10)**

**T.A.7.7.5**

अन्तरिक्षप्र उरोर्वरीयान् । अशीमहि त्वा मा मा हि৺सीः ॥

त्वमग्ने गृहपतिर्–विशामसि । विश्वासाम् मानुषीणाम् ।

शतम् पूर्भिर्यविष्ठ पाह्य৺हसः । समेद्धार৺ शत৺ हिमाः ।

तं द्राविण৺ हार्दिवानम् । इहैव रातयः सन्तु ॥ त्वष्टीमती ते सपेय ।

सुरेता रेतो दधाना ( ) । वीरं ँविदेय तव सन्दृशि ।

माऽह৺ रायस्पोषेण वि योषम् ॥ **26 (12)**

*(रोचते–सूर्यय त्वा – देवायुवं – द्रविणोदा – दधाना द्वे च) (A7)*

अनुवाकं–8

**T.A.7.8.1**

देवस्य त्वा सवितुः प्रसवे । अश्विनोर् बाहुभ्याम् ।

पूष्णो हस्ताभ्यामा ददे ॥ अदित्यै रास्नाऽसि । इड एहि ।

अदित एहि । सरस्वत्येहि । असावेहि ।

असावेहि । असावेहि । **27 (10)**

**T.A.7.8.2**

अदित्या उष्णीषमसि । वायुरस्यैडः । पूषा त्वोपावसृजतु ।

अश्विभ्याम् प्र दापय । यस्ते स्तनः शशयो यो मयोभूः ।

येन विश्वा पुष्यसि वार्याणि । यो रत्नधा वसुविद्यः सुदत्रः ।

सरस्वति तमिह धातवेऽकः ॥ उस्र घर्मꣳ शिꣳष ।

उस्र घर्मम् पाहि । **28 (10)**

**T.A.7.8.3**

घर्माय शिꣳष । बृहस्पतिस्त्वोपसीदतु । दानवः स्थ पेरवः ।

विष्वग्वृतो लोहितेन । अश्विभ्याम् पिन्वस्व । सरस्वत्यै पिन्वस्व ।

पूष्णे पिन्वस्व । बृहस्पतये पिन्वस्व । इन्द्राय पिन्वस्व ।

इन्द्राय पिन्वस्व । **29 (10)**

**T.A.7.8.4**

गायत्रोऽसि । त्रैष्टुभोऽसि । जागतमसि । सहोर्जो भागेनोप मेहि ।

इन्द्राश्विना मधुनः सारघस्य । घर्मम् पात वसवो यजता वट् ।

स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमि । मधु हविरसि ।

सूर्यस्य तपस्तप । द्यावापृथिवीभ्यां त्वा परिगृह्णामि ( ) । **30 (10)**

**T.A.7.8.5**

अन्तरिक्षेण त्वोपयच्छामि ।

देवानां त्वा पितृणामनुमतो भर्तुꣳ शकेयम् । तेजोऽसि ।

तेजोऽनुप्रेहि । दिविस्पृङ्मा मा हिꣳसीः ।

अन्तरिक्षस्पृङ्मा मा हिꣳसीः । पृथिविस्पृङ्मा मा हिꣳसीः ।

सुवरसि सुवर्मे यच्छ । दिवं ँयच्छ दिवो मा पाहि ॥ **31 (9)**

***(एहि – पाहि – पिन्वस्व – गृह्णामि – +नव च) (A8)***

अनुवाकं–9

**T.A.7.9.1**

समुद्राय त्वा वाताय स्वाहा । सलिलाय त्वा वाताय स्वाहा ।

अनाधृष्याय त्वा वाताय स्वाहा । अप्रतिधृष्याय त्वा वाताय स्वाहा ।

अवस्यवे त्वा वाताय स्वाहा । दुवस्वते त्वा वाताय स्वाहा ।

शिमिद्वते त्वा वाताय स्वाहा । अग्नये त्वा वसुमते स्वाहा ।

सोमाय त्वा रुद्रवते स्वाहा ।

वरुणाय त्वाऽऽदित्यवते स्वाहा । **32 (10)**

**T.A.7.9.2**

बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ।

सवित्रे त्वर्भुमते विभुमते प्रभुमते वाजवते स्वाहा ।

यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहा ॥ विश्वा आशा दक्षिणसत् ।

विश्वान् देवानयाडिह । स्वाहाकृतस्य घर्मस्य । मधोः पिबतमश्विना ।

स्वाहाऽग्नये यज्ञियाय । शं ँयजुर्भिः ॥

अश्विना घर्मम् पात~ँ हार्दिवानम् । **33 (10)**

**T.A.7.9.3**

अहर्-दिवाभि-रूतिभिः । अनु वान् द्यावापृथिवी म~ँसाताम् ।

स्वाहेन्द्राय ॥ स्वाहेन्द्रावट् । घर्ममपातमश्विना हार्दिवानम् ।

अहर्-दिवाभिरूतिभिः । अनु वान् द्यावापृथिवी अम~ँसाताम् ।

तम् प्राव्यं ँयथा वट् । नमो दिवे । नमः पृथिव्यै ( ) । **34 (10)**

**T.A.7.9.4**

दिवि धा इमं यँज्ञम् । यज्ञमिमं दिवि धाः । दिवङ्गच्छ ।

अन्तरिक्षङ्गच्छ । पृथिवीङ्गच्छ । पञ्च प्रदिशो गच्छ ।

देवान् घर्मपान् गच्छ । पितॄन् घर्मपान् गच्छ ॥ **35 (8)**

*(आदित्यवते स्वाहा-हार्दिवानम्-पृथिव्या-+अष्टौ च) (A9)*

अनुवाकं-10

**T.A.7.10.1**

इषे पीपिहि । ऊर्जे पीपिहि । ब्रह्मणे पीपिहि । क्षत्राय पीपिहि ।

अद्भ्यः पीपिहि । ओषधीभ्यः पीपिहि । वनस्पतिभ्यः पीपिहि ।

द्यावापृथिवीभ्याम् पीपिहि । सुभूताय पीपिहि ।

ब्रह्मवर्चसाय पीपिहि । **36 (10)**

**T.A.7.10.2**

यजमानाय पीपिहि । मह्यञ्ज्यैष्ठ्याय पीपिहि ॥ त्विष्यै त्वा ।

द्युम्नाय त्वा । इन्द्रियाय त्वा भूत्यै त्वा । धर्माऽसि सुधर्मा मे न्यस्मे ।

ब्रह्माणि धारय । क्षत्राणि धारय । विशन्धारय ।

नेत्वा वातः स्कन्दयात् । **37 (10)**

**T.A.7.10.3**

अमुष्य त्वा प्राणे सादयामि । अमुना सह निरर्थङ्गच्छ ।
योऽस्मान् द्वेष्टि । यञ्च वयं द्विष्मः ॥ पूष्णे शरसे स्वाहा ।
ग्रावभ्यः स्वाहा । प्रतिरेभ्यः स्वाहा । द्यावापृथिवीभ्या॰ स्वाहा ।
पितृभ्यो घर्मपेभ्यः स्वाहा ॥ रुद्राय रुद्रहोत्रे स्वाहा । **38 (10)**

**T.A.7.10.4**

अहर् ज्योतिः केतुना जुषताम् । सुज्योतिर् ज्योतिषा॰ स्वाहा ।
रात्रिर्ज्योतिः केतुना जुषताम् । सुज्योतिर्-ज्योतिषा॰ स्वाहा ।
अपीपरो माऽह्नो रात्रियै मा पाहि । एषा ते अग्ने समित् ।
तया समिद्ध्यस्व । आयुर्मे दाः । वर्चसा माऽञ्जीः ।
अपीपरो मा रात्रिया अह्नो मा पाहि । **39 (10)**

**T.A.7.10.5**

एषा ते अग्ने समित् । तया समिद्ध्यस्व । आयुर्मे दाः ।
वर्चसा माऽञ्जीः । अग्निर्-ज्योतिर्-ज्योतिरग्निः स्वाहा ।
सूर्यो ज्योतिर्-ज्योतिः सूर्यः स्वाहा । भूः स्वाहा । हुत॰ हविः ।
मधु हविः । इन्द्रतमेऽग्नौ ( ) । **40 (10)**

**T.A.7.10.6**

पिता नोऽसि मा मा हि(ग्ं)सीः । अश्याम ते देवघर्म ।

मधुमतो वाजवतः पितुमतः । अङ्गिरस्वतः स्वधाविनः ।

अशीमहि त्वा मा मा हि(ग्ं)सीः ॥ स्वाहा त्वा सूर्यस्य रश्मिभ्यः ।

स्वाहा त्वा नक्षत्रेभ्यः ॥ **41 (7)**

*(ब्रह्मवर्चसाय पीपिहि - स्कन्दयाद् - रुद्राय रुद्रहोत्रे स्वाहा -*

*ऽह्नो मा पाह् - यग्नौ - +सप्त च) (A10)*

अनुवाकं-11

**T.A.7.11.1**

घर्म या ते दिवि शुक् । या गायत्रे छन्दसि । या ब्राह्मणे ।

या हविर्द्धाने । तान्त एतेनावयजे स्वाहा ॥ घर्म या तेऽन्तरिक्षे शुक् ।

या त्रैष्टुभे छन्दसि । या राजन्ये । याऽऽग्नीद्ध्रे ।

तान्त एतेनावयजे स्वाहा । **42 (10)**

**T.A.7.11.2**

घर्म या ते पृथिव्या(ग्ं) शुक् । या जागते छन्दसि । या वैश्ये ।

या सदसि । तान्त एतेनावयजे स्वाहा ॥ अनुनोऽद्यानुमतिः{**1**} ।

अन्विदनुमते त्वम् {**2**} । दिवस्त्वा परस्पायाः ।

अन्तरिक्षस्य तनुवः पाहि । पृथिव्यास्त्वा धर्मणा । **43 (10)**

**T.A.7.11.3**

वयमनुक्रामाम सुविताय नव्यसे ॥ ब्रह्मणस्त्वा परस्पायाः ।

क्षत्रस्य तनुवः पाहि । विशस्त्वा धर्मणा ।

वयमनुक्रामाम सुविताय नव्यसे ॥ प्राणस्य त्वा परस्पायै ।

चक्षुषस्तनुवः पाहि । श्रोत्रस्य त्वा धर्मणा ।

वयमनुक्रामाम सुविताय नव्यसे ॥ वल्गुरसि शं ँयुधायाः । **44 (10)**

**T.A.7.11.4**

शिशुर्–जनधायाः ॥ शञ्च वक्षि परि च वक्षि ।

चतुः स्रक्तिर्नाभिर्. ऋतस्य । सदो विश्वायुः शर्म सप्रथाः ।

अप द्वेषो अप ह्वरः । अन्यद्व्रतस्य सश्चिम ।

घर्मैतत् तेऽन्नमेतत् पुरीषम् । तेन वर्द्धस्व चा च प्यायस्व ।

वर्द्धिषीमहि च वयम् । आ च प्यासिषीमहि ॥ **45 (10)**

**T.A.7.11.5**

रन्तिर्–नामासि दिव्यो गन्धर्वः । तस्य ते पद्वद्धविर्द्धानम् ।

अग्निरद्ध्यक्षाः । रुद्रोऽधिपतिः ॥ समहमायुषा । सम् प्राणेन ।

सं ँवर्चसा । सम् पयसा । सङ्गौपत्येन । स७ं रायस्पोषेण ॥ **46 (10)**

**T.A.7.11.6**

व्यसौ । योऽस्मान् द्वेष्टि । यञ्च वयं द्विष्मः ॥ अचिक्रदद्वृषा हरिः ।

महान्–मित्रो न दर्.शतः । स७ं सूर्येण रोचते ॥

चिदसि समुद्रयोनिः । इन्दुर् दक्षः श्येन ऋतावा ।

हिरण्यपक्षः शकुनो भुरण्युः ।

महान्थ् सधस्थे ध्रुव आनिषत्तः । **47 (10)**

**T.A.7.11.7**

नमस्ते अस्तु मा मा हि७ंसीः ॥ विश्वावसु७ं सोम गन्धर्वम् ।

आपो ददृशुषीः । तदृतेना व्यायन्न् । तदन्ववैत् ।

इन्द्रो रारहाण आसाम् । परि सूर्यस्य परिधी७ं रपश्यत् ॥

विश्वावसुरभि तन्नो गृणातु । दिव्यो गन्धर्वो रजसो विमानः ।

यद्वा घा सत्यमुत यन्न विद्म । **48 (10)**

**T.A.7.11.8**

धियो हिन्वानो धिय इन्नो अव्यात् ॥ सस्निमविन्दच्चरणे नदीनाम् ।

अपावृणोद्–दुरो अश्मव्रजानाम् । प्रासान् गन्धर्वो अमृतानि वोचत् ।

इन्द्रो दक्षम् परिजानादहीनम् ॥ एतत्त्वम् देव घर्म देवो देवानुपागाः ।

इदमहम् मनुष्यो मनुष्यान् । सोमपीथानु मेहि ।

सह प्रजया सह रायस्पोषेण ॥

सुमित्रा न आप ओषधयः सन्तु ( ) । **49 (10)**

**T.A.7.11.9**

दुर्मित्रास्तस्मै भूयासुः । योऽस्मान् द्वेष्टि । यञ्च वयं द्विष्मः ॥

उद्वयन्तमसस्परि {3} । उदुत्यं चित्रम् {4} ।

इममू षु त्यमस्मभ्य॑ँ सनिम् । गायत्रन्नवीया॑ँसम् ।

अग्ने देवेषु प्रवोचः ॥ **50 (8)**

*(याऽग्नीद्ध्रे तान्ता एतेनावयजे स्वाहा – धर्मणा – शं युँधायाः – प्यासिषीमहि–पोषेण–निषत्तो–विघ्न–सन्–+त्वष्टौ च) (A11)*

अनुवाकं–12

**T.A.7.12.1**

महीनाम् पयोऽसि विहितं देवत्रा ।

ज्योतिर्भा असि वनस्पतीनामोषधीना॑ँ रसः ।

वाजिनम् त्वा वाजिनोऽव नयामः ।

ऊ॒द्ध्र्वम् मनः सु॒व॒र्गम् ॥ **51(4)** *(A12)*

<u>अनुवाकं–13</u>

**<u>T.A.7.13.1</u>**

अस्का॒न् द्यौः पृ॒थि॒वीम् । अस्कानृ॒षभो यु॒वा गाः ।

स्क॒न्नेमा विश्वा॒ भुवना । स्क॒न्नो य॒ज्ञः प्रजनयतु ॥

अस्का॒नज॒नि प्राजनि । आ स्क॒न्नाज्जायते॒ वृषा ।

स्क॒न्नात् प्रजनिषीमहि ॥ **52 (7)** *(A13)*

<u>अनुवाकं–14</u>

**<u>T.A.7.14.1</u>**

या पु॒रस्ताद् वि॒द्युदापतत् । तान्त ए॒तेनाव यजे॒ स्वाहा ।

या दक्षि॒णतः । या प॒श्चात् । योत्त॒रतः । योपरिष्टाद् वि॒द्युदापतत् ।

तान्त ए॒तेनाव यजे॒ स्वाहा ॥ **53 (7)** *(A14)*

<u>अनुवाकं–15</u>

**<u>T.A.7.15.1</u>**

प्रा॒णा॒य स्वाहा व्या॒ना॒य स्वाहा ऽपा॒ना॒य स्वाहा ।

चक्षुषे॒ स्वाहा॒ श्रोत्रा॒य स्वाहा ।

मनसे॒ स्वाहा वा॒चे सरस्वत्यै॒ स्वाहा ॥ **54 (3)** *(A15)*

अनुवाकं–16

**T.A.7.16.1**

पूष्णे स्वाहा पूष्णे शरसे स्वाहा ।
पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा ।
पूष्णेऽङ्घृणये स्वाहा पूष्णे नरुणाय स्वाहा ।
पूष्णे साकेताय स्वाहा ॥ **55 (4)** *(A16)*

अनुवाकं–17

**T.A.7.17.1**

उदस्य शुष्माद् भानुर्नार्त बिभर्ति । भारम् पृथिवी न भूम ।
प्र शुक्रैतु देवी मनीषा । अस्मथ् सुतष्टो रथो न वाजी ।
अर्चन्त एके महि साम मन्वत । तेन सूर्यमधारयन्न् ।
तेन सूर्यमरोचयन्न् । घर्मः शिरस्तदयमग्निः ।
पुरीषमसि संप्रियम् प्रजया पशुभिर्भुवत् । प्रजापतिस्त्वा सादयतु ।
तया देवतया ऽङ्गिरस्वद् ध्रुवा सीद ॥ **56 (11)** *(A17)*

अनुवाकं–18

**T.A.7.18.1**

यास्ते अग्न आर्द्रा योनयो याः कुलायिनीः ।

ये ते अग्न इन्दवो या उ नाभयः । यास्ते अग्ने तनुव ऊर्जो नाम ।

ताभिस्त्वमुभयीभिः सम्ँविदानः । प्रजाभिरग्ने द्रविणेह सीद ।

प्रजापतिस्त्वा सादयतु ।

तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥ **57 (7)** *(A18)*

अनुवाकं–19

**T.A.7.19.1**

अग्निरसि वैश्वानरोऽसि । सम्ँवथ्सरोऽसि परिवथ्सरोऽसि ।

इदावथ्सरोऽसीदुवथ्सरोऽसि । इद्वथ्सरोऽसि वथ्सरोऽसि ।

तस्य ते वसन्तः शिरः । ग्रीष्मो दक्षिणः पक्षः । वर्.षाः पुच्छम् ।

शरदुत्तरः पक्षः । हेमन्तो मद्ध्यम् । पूर्वपक्षाश्चितयः ( ) ।

अपरपक्षाः पुरीषम् । अहोरात्राणीष्टकाः ।

तस्य ते मासाश्चार्द्धमासाश्च कल्पन्ताम् ।

ऋतवस्ते कल्पन्ताम् । सम्ँवथ्सरस्ते कल्पताम् ।

अहोरात्राणि ते कल्पन्ताम् । एति प्रेति वीति समित्युदिति ।

प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥ **58 (19)**

*(चितयो नव च) (A19)*

अनुवाकं–20

**T.A.7.20.1**

भूर्भुवस्सुवः । ऊद्ध्र्व ऊ षुण ऊतये । ऊद्ध्र्वो नः पाह्यꣳहसः ॥

विधुन्दद्राणꣳ समने बहूनाम् । युवानꣳ सन्तम् पलितो जगार ।

देवस्य पश्य काव्यम् महित्वाऽद्या ममार । स ह्यः समान ॥

यदृते चिदभिश्रिषः । पुरा जर्तृभ्य आतृदः ।

सन्धाता सन्धिम् मघवा पुरोवसुः । **59 (10)**

**T.A.7.20.2**

निष्कर्ता विह्रुतम् पुनः ॥ पुनरूर्जा{**5**}, सह रय्या {**6**} ।

मा नो घर्म व्यथितो विव्यथो नः । मा नः परमधरम्मा रजोऽनैः ।

मोष्वस्मा७ स्तमस्यन्तरा धाः । मा रुद्रियासो अभिगुर्वृधानः ॥

मा नः क्रतुभिर्. हीडितेभिरस्मान् । द्विषा सुनीते मा परादाः ।

मा नो रुद्रो निर्.ऋतिर्मा नो अस्ता ।

मा द्यावापृथिवी हीडिषाताम् ॥ **60 (10)**

**T.A.7.20.3**

उप नो मित्रावरुणाविहावतम् । अन्वादीद्ध्याथामिह नः सखाया ।

आदित्यानाम् प्रसितिर्.हेतिः । उग्रा शतापाष्ठा घ विषा परिणो वृणक्तु ॥

इमम् मे वरुण{7}, तत्त्वा यामि{8} । त्वन्नो अग्ने{9},

स त्वन्नो अग्ने{10} । त्वमग्ने अयासि{11) ॥

उद्वयन्तमसस्परि {12} । उदुत्यं{13}, चित्रम् {14} ।

वयः सुपर्णाः {15} ( ) ॥ **61 (10)**

*(पुरोवसुर्.हीडिषाता॒ँ सुपर्णाः) (A20)*

अनुवाकं–21

**T.A.7.21.1**

भूर्भुवस्सुवः । मयि त्यदिन्द्रियम् महत् । मयि दक्षो मयि क्रतुः ।

मयि धायि सुवीर्यम् । त्रिशुग्घर्मो विभातु मे । आकूत्या मनसा सह ।

विराजा ज्योतिषा सह । यज्ञेन पयसा सह । ब्रह्मणा तेजसा सह ।

क्षत्रेण यशसा सह ( ) । सत्येन तपसा सह । तस्य दोहमशीमहि ।

तस्य सुम्नमशीमहि । तस्य भक्षमशीमहि ।

तस्य॑ त॒ इन्द्रे॑ण पी॒तस्य॒ मधु॑मतः ।
उ॑पहू॒तस्यो॑पहूतो भक्षयामि ॥ **62 (16)**
*(यश॑सा स॒ह षट्च॑) (A21)*

<u>अनु॒वाकं–22</u>

**<u>T.A.7.22.1</u>**

यास्ते॑ अग्ने घो॒रास्त॒नुवः॑ । क्षुच्च॒ तृष्णा॑ च । अस्नु॒क्चाना॑हु॒तिश्च॑ ।
अ॒श॒न॒या च॑ पिपा॒सा च॑ । से॒दिश्चाम॑तिश्च । ए॒तास्ते॑ अग्ने घो॒रास्त॒नुवः॑ ।
ताभि॑र॒मु॑ङ्गच्छ । यो॑ऽस्मान् द्वेष्टि॑ ।
यञ्च॑ व॒यं द्वि॒ष्मः ॥ **63 (9)** *(A22)*

<u>अनु॒वाकं–23</u>

**<u>T.A.7.23.1</u>**

स्निक्च॒ स्नीहि॑तिश्च॒ स्निहि॑तिश्च । उ॒ष्णा च॑ शी॒ता च॑ ।
उ॒ग्रा च॑ भी॒मा च॑ । स॒दाम्नी॑ से॒दिरनि॑रा । ए॒तास्ते॑ अग्ने घो॒रास्त॒नुवः॑ ।
ताभि॑र॒मु॑ङ्गच्छ । यो॑ऽस्मान् द्वेष्टि॑ ।
यञ्च॑ व॒यं द्वि॒ष्मः ॥ **64 (8)** *(A23)*

अनुवाकं–24

**T.A.7.24.1**

धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयꣳश्च ।

निलिम्पश्च विलिम्पश्च विक्षिपः ॥ **65 (2)** *(A24)*

अनुवाकं–25

**T.A.7.25.1**

उग्रश्च धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयꣳश्च ।

सहसह्वाꣳश्च सहमानश्च सहस्वाꣳश्च सहीयाꣳश्च ।

एत्य प्रेत्य विक्षिपः ॥ **66 (3)** *(A25)*

अनुवाकं–26

**T.A.7.26.1**

अहोरात्रे त्वोदीरयताम् । अर्द्धमासास्त्वोदीं जयन्तु ।

मासास्त्वा श्रपयन्तु । ऋतवस्त्वा पचन्तु ।

सम्ँवथ्सरस्त्वा हन्त्वसौ ॥ **67 (5)** *(A26)*

अनुवाकं–27

**T.A.7.27.1**

खट् फड् जहि । छिन्धी भिन्धी हन्धी कट् ।

इति वाचः क्रूराणि ॥ **68 (3)** *(A27)*

अनुवाकं–28

**T.A.7.28.1**

विगा इन्द्र विचरन्थ् स्पाशयस्व । स्वपन्तमिन्द्र पशुमन्तमिच्छ ।

वज्रेणामुम् बोधय दुर्विदत्रम् । स्वपतोऽस्य प्रहर भोजनेभ्यः ॥

अग्ने अग्निना सम्ँवदस्व । मृत्यो मृत्युना सम्ँवदस्व ।

नमस्ते अस्तु भगवः ॥ सकृत्ते अग्ने नमः । द्विस्ते नमः ।

त्रिस्ते नमः ( ) । चतुस्ते नमः । पञ्चकृत्वस्ते नमः ।

दशकृत्वस्ते नमः । शतकृत्वस्ते नमः । आसहस्रकृत्वस्ते नमः ।

अपरिमितकृत्वस्ते नमः । नमस्ते अस्तु मा मा हिꣳसीः ॥ **69 (17)**

*(त्रिस्ते नमः सप्त च) (A28)*

अनुवाकं–29

**T.A.7.29.1**

असृन् मुखो रुधिरेणाव्यक्तः । यमस्य दूतः श्वपाद्–विधावसि ।

गृद्ध्रः सुपर्णः कुणपन्निषेवसे ।

यमस्य दूतः प्रहितो भवस्य चोभयोः ॥ **70 (4)** *(A29)*

अनुवाकं–30

**T.A.7.30.1**

यदेतद्–वृकसो भूत्वा । वाग् देव्यभिरायसि । द्विषन्तम् मेऽभिराय ।

तम् मृत्यो मृत्यवे नय । स आर्त्याऽऽर्तिमार्च्छतु ॥ **71 (5)** *(A30)*

अनुवाकं–31

**T.A.7.31.1**

यदीषितो यदि वा स्वकामी । भयेडको वदति वाचमेताम् ।

तामिन्द्राग्नी ब्रह्मणा सम्ँविदानौ ।

शिवामस्मभ्यं कृणुतङ्गृहेषु ॥ **72 (4)** *(A31)*

अनुवाकं–32

**T.A.7.32.1**

दीर्घमुखि दुर्.हणु । मा स्म दक्षिणतो वदः ।

यदि दक्षिणतो वदाद् द्विषन्तम् मेऽव बाधासै ॥ **73 (3)** *(A32)*

अनुवाकं–33

**T.A.7.33.1**

इत्थादुलूक आपप्तत् । हिरण्याक्षो अयोमुखः ।

रक्षसान्दूत आगतः । तमितो नाशयाग्ने ॥ **74 (4)** *(A33)*

अनुवाकं–34

**T.A.7.34.1**

यदेतद् भूतान्यन्वाविश्य । दैवीं वाचं वदसि । द्विषतो नः परावद ।

तान् मृत्यो मृत्यवे नय । त आर्त्याऽऽर्तिमार्च्छन्तु ।

अग्निनाऽग्निः सम् वदताम् ॥ **75 (6)** *(A34)*

अनुवाकं–35

**T.A.7.35.1**

प्रसार्य सक्थ्यौ पतसि । सव्यमक्षि निपेपि च ।

मेह कस्यचनाममत् ॥ **76 (3)** *(A35)*

अनुवाकं–36

**T.A.7.36.1**

अत्रिणा त्वा क्रिमे हन्मि । कण्वेन जमदग्निना ।

विश्वावसोर् ब्रह्मणा हतः । क्रिमीणा राजा ।

अप्येषा स्थपतिर्हतः । अथो माताऽथो पिता ।

अथो स्थूरा अथो क्षुद्राः । अथो कृष्णा अथो श्वेताः ।

अथो आशातिका हताः ।

श्वेताभिः सह सर्वे हताः ॥ **77 (10)** *(A36)*

<u>अनुवाकं–37</u>

**<u>T.A.7.37.1</u>**

आहरावद्य । शृतस्य हविषो यथा । तथ् सत्यम् ।

यदमुं ँयमस्य जम्भयोः । आदधामि तथा हि तत् ।

खण्फण्म्रसि ॥ **78 (6)** *(A37)*

<u>अनुवाकं–38</u>

**<u>T.A.7.38.1</u>**

ब्रह्मणा त्वा शपामि । ब्रह्मणस्त्वा शपथेन शपामि ।

घोरेण त्वा भृगूणाञ्चक्षुषा प्रेक्षे ।

रौद्रेण त्वाङ्गिरसाम् मनसा ध्यायामि ।

अघस्य त्वा धारया विद्ध्यामि ।

अधरो मत् पद्यस्वासौ ॥ **79 (6)** *(A38)*

<u>अनुवाकं–39</u>

**<u>T.A.7.39.1</u>**

उत्तुद शिमिजावरि । तल्पेजे तल्प उत्तुद । गिरीᳪं रनु प्रवेशय ।

मरीचीरुप सन्नुद । यावदितः पुरस्तादुदयाति सूर्यः ।

तावदितोऽमुन्नाशय । योऽस्मान् द्वेष्टि ।

यञ्च वयम् द्विष्मः ॥ **80 (8)** *(A39)*

<u>अनुवाकं-40</u>

**<u>T.A.7.40.1</u>**

भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः ।

भुवोऽद्धायि भुवोऽद्धायि भुवोऽद्धायि ।

नृम्णायि नृम्णम् नृम्णायि नृम्णम् नृम्णायि नृम्णम् ।

निधा य्योऽवायि निधा य्योऽवायि निधा य्योऽवायि ।

ए अस्मे अस्मे । सुवर्न ज्योतीः ॥ **81 (6)** *(A40)*

<u>अनुवाकं-41</u>

**<u>T.A.7.41.1</u>**

पृथिवी समित् । तामग्निः समिन्धे । साऽग्नि॑ समिन्धे ।

तामह॑ समिन्धे । सा मा समिद्धा । आयुषा तेजसा ।

वर्चसा श्रिया । यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ता॒ स्वाहा ॥

अन्तरिक्ष॑ समित् । **82 (10)**

**<u>T.A.7.41.2</u>**

तां ँवायुः समिन्धे । सा वायु॑ समिन्धे । तामह॑ समिन्धे ।

सा मा समिद्धा । आयुषा तेजसा । वर्चसा श्रिया ।

यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ता॰ स्वाहा । द्यौः समित् ।
तामादित्यः समिन्धे । **83 (10)**

**T.A.7.41.3**

साऽऽदित्य॑ समिन्धे । तामह॑ समिन्धे । सा मा समिद्धा ।
आयुषा तेजसा । वर्चसा श्रिया । यशसा ब्रह्मवर्चसेन ।
अन्नाद्येन समिन्ता॰ स्वाहा ॥ प्राजापत्या मे समिदसि सपत्नक्षयणी ।
भ्रातृव्यहा मेऽसि स्वाहा ॥ अग्ने व्रतपते व्रतञ्चरिष्यामि । **84 (10)**

**T.A.7.41.4**

तच्छकेयं तन्मे राद्ध्यताम् । वायो व्रतपत आदित्य व्रतपते ।
व्रतानां ँव्रतपते व्रतञ्चरिष्यामि । तच्छकेयं तन्मे राद्ध्यताम् ॥
द्यौः समित् । तामादित्यः समिन्धे । साऽऽदित्य॑ समिन्धे ।
तामह॑ समिन्धे । सा मा समिद्धा । आयुषा तेजसा । **85 (10)**

**T.A.7.41.5**

वर्चसा श्रिया । यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ता॰ स्वाहा ।
अन्तरिक्ष॑ समित् । तां ँवायुः समिन्धे । सा वायु॑ समिन्धे ।

तामह७ँ समिन्धे । सा मा समिद्धा । आयुषा तेजसा ।

वर्चसा श्रिया । **86 (10)**

**T.A.7.41.6**

यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ता७ँ स्वाहा । पृथिवी समित् ।

तामग्निः समिन्धे । साऽग्नि७ँ समिन्धे । तामह७ँ समिन्धे ।

सा मा समिद्धा । आयुषा तेजसा । वर्चसा श्रिया ।

यशसा ब्रह्मवर्चसेन ( ) । **87 (10)**

**T.A.7.41.7**

अन्नाद्येन समिन्ता७ँ स्वाहा । प्राजापत्या मे समिदसि सपत्नक्षयणी ।

भ्रातृव्यहा मेऽसि स्वाहा । आदित्य व्रतपते व्रतमचारिषम् ।

तदशकं तन्मेऽराधि । वायो व्रतपतेऽग्ने व्रतपते ।

व्रतानां ँव्रतपते व्रतमचारिषम् । तदशकं तन्मेऽराधि ॥ **88 (8)**

*(समिथ् – समिन्धे – व्रतञ्चरिष्या – म्यायुषा तेजसा – वर्चसा श्रिया – यशसा ब्रह्मवर्चसेना – +ष्टौ च) (A41)*

अनुवाकं-42

**T.A.7.42.1**

शन्नो वातः पवताम् मातरिश्वा शन्नस्तपतु सूर्यः ।

अहानि शम् भवन्तु नः श२ं रात्रिः प्रतिधीयताम् ॥

शमुषा नो व्युच्छतु शमादित्य उदेतु नः ।

शिवा नः शन्तमा भव सुमृडीका सरस्वति । मा ते व्योम सन्दृशि ॥

इडायै वास्त्वसि वास्तुमद् वास्तुमन्तो भूयास्म मा वास्तो-श्छित्थ्स्मह्य

वास्तुः स भूयाद्-योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः ॥

प्रतिष्ठाऽसि प्रतिष्ठावन्तो भूयास्म मा प्रतिष्ठाया- श्छित्थ्स्मह्य प्रतिष्ठः

स भूयाद् योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः ॥

आ वात वाहि भेषजम् ँवि वात वाहि यद्रपः ।

त्व२ं हि विश्वभेषजो देवानां दूत ईयसे ॥

द्वाविमौ वातौ वात आ सिन्धोरा परावतः । **89 (10)**

**T.A.7.42.2**

दक्षम् मे अन्य आवातु पराऽन्यो वातु यद्-रपः ॥

यददो वात ते गृहेऽमृतस्य निधिर्.हितः ।

ततो नो देहि जीवसे ततो नो धेहि भेषजम् ॥

ततो नो मह आवह वात आवातु भेषजम् ।

शम्भूर् मयोभूर्नो हृदे प्र ण आयूꣳषि तारिषत् ॥

इन्द्रस्य गृहोऽसि तम् त्वा प्रपद्ये सगुस्साश्वः ।

सह यन्मे अस्ति तेन ॥

भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवस्सुवः प्रपद्ये वायुम्

प्रपद्येऽनार्ताम् देवताम् प्रपद्ये ऽश्मानमाखणम् प्रपद्ये प्रजापतेर्

ब्रह्मकोशम् ब्रह्म प्रपद्य ओम् प्रपद्ये ॥

अन्तरिक्षम् म उर्वन्तरम् बृहदग्नयः पर्वताश्च यया वातः स्वस्त्या

स्वस्तिमान्तया स्वस्त्या स्वस्ति मानसानि ॥

प्राणापानौ मृत्योर्मा पातम् प्राणापानौ मा मा हासिष्टम् मयि मेधाम्

मयि प्रजाम् मय्यग्नि स्तेजो दधातु मयि मेधाम् मयि प्रजाम्

मयीन्द्र इन्द्रियम् दधातु मयि मेधाम् मयि प्रजाम् मयि सूर्यो

भ्राजो दधातु ॥ **90 (10)**

**T.A.7.42.3**

द्युभिरक्तुभिः परिपात–मस्मानरिष्टेभि–रश्विना सौभगेभिः ।

तन्नो मित्रो वरुणो मामहन्ता मदितिः सिन्धुः पृथिवी उत द्यौः ॥

कया नश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥

कस्त्वा सत्यो मदानाम् मꣳहिष्ठो मथ्सदन्धसः ।

दृढा चिदारुजे वसु ॥ अभी षु णः सखीनामविता जरितॄणाम् ।

शतम् भवास्यूतिभिः ॥

वयः सुपर्णा उपसेदुरिन्द्रम् प्रियमेधा ऋषयो नाधमानाः ।

अप ध्वान्तमूर्णुहि पूर्द्धि चक्षुर् मुमुग्ध्यस्मा–न्निधयेव

बद्धान् ॥ **91 (10)**

**T.A.7.42.4**

शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं ँयोरभिस्रवन्तु नः ॥

ईशाना वार्याणाम् क्षयन्तीश्चर्.षणीनाम् । अपो याचामि भेषजम् ॥

सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासुर्–योऽस्मान्–

द्वेष्टि यञ्च वयं द्विष्मः ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः ।

उशतीरिव मातरः ॥

तस्मा अरम् गमाम वो यस्य क्षयाय जिन्वथ । **92 (10)**

**T.A.7.42.5**

आपो जनयथा च नः ॥

पृथिवी शान्ता साऽग्निना शान्ता सा मे शान्ता शुच॑ँ शमयतु ॥

अन्तरिक्ष॑ँ शान्तं तद् वायुना शान्तं तन्मे शान्त॑ँ शुच॑ँ शमयतु ।

द्यौः शान्ता साऽऽदित्येन शान्ता सा मे शान्ता शुच॑ँ शमयतु ॥

पृथिवी शान्तिरन्तरिक्ष॑ँ शान्तिर् द्यौः शान्तिर् दिशः शान्ति

रवान्तरदिशाः शान्ति रग्निः शान्तिर् वायुः शान्ति रादित्यः शान्ति

श्चन्द्रमाः शान्तिर् नक्षत्राणि शान्ति रापः शान्ति रोषधयः शान्तिर्

वनस्पतयः शान्तिर् गौः शान्ति रजा शान्ति रश्वः शान्तिः पुरुषः

शान्तिर् ब्रह्म शान्तिर् ब्राह्मणः शान्तिः शान्तिरेव शान्तिः शान्तिर्मे

अस्तु शान्तिः ॥

तयाऽह॑ꣳ शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुष्पदे च शान्तिम् करोमि

शान्तिर्मे अस्तु शान्तिः ॥

एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि

मोत्तिष्ठन्त–मनूत्तिष्ठन्तु मा मा॑ श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा

श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः ॥

उदायुषा स्वायुषोदोषधीना॑ꣳ रसेनोत् पर्जन्यस्य शुष्मेणोदस्था–

ममृता॑ꣳ अनु ॥

तच्चक्षुर् देवहितम् पुरस्ता च्छुक्रमुच्चरत् ।

पश्येम शरदः शतम् जीवेम शरदः शतम् नन्दाम शरदः शतम्

मोदाम शरदः शतम् भवाम शरदः शत॑ꣳ शृणवाम शरदः शतम्

प्रब्रवाम शरदः शत मजीताः स्याम शरदः शतम् ज्योक्च

सूर्यम् दृशे ( ) ॥ **93 (10)**

**T.A.7.42.6**

य उदगान् महतोऽर्णवाद्–विभ्राजमानः सरिरस्य मद्ध्याथ्स मा

वृषभो लोहिताक्षः सूर्यो विपश्चिन् मनसा पुनातु ॥

ब्रह्मणः श्रोतन्यसि ब्रह्मण आणी स्थो ब्रह्मण आवपनमसि धारितेयम्
पृथिवी ब्रह्मणा मही धारितमेनेन महदन्तरिक्षम् दिवम् दाधार
पृथिवी॒ꣳ सदेवां यँदहं वेँद तदहं धारयाणि
मा मद्वेदोऽधि विस्रसत् ॥

मेधामनीषे माऽऽविशताꣳ समीची भूतस्य भव्यस्यावरुद्ध्यै
सर्वमायुरयाणि सर्वमायुरयाणि ॥

आभिर् गीर्भिर् यदतो न ऊनमाप्यायय हरिवो वद्र्धमानः ।
यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम ॥

ब्रह्म प्रावादिष्म तन्नो मा हासीत् ॥

ओम् शान्तिः शान्तिः शान्तिः ॥ **94 (7)**

*(परावतो-दधातु-बद्धान्-जिन्वथ-दृशे-+सप्त च) (A42)*

**Prapaataka Korvai with starting Padams of 1 to 42 Anuvaakams :-**

(नमो - युञ्जते - वृष्णो अश्वस्य - ब्रह्मन् प्रवर्ग्येण - ब्रह्मन् प्रचरिष्यामो - दश प्राची - रपश्यङ्गोपाम् - देवस्य - समुद्रा - येषे पीपिहि - घर्म या ते - महीनाम् चत्वा - र्यस्कान्. - या पुरस्ताथ् सप्त सप्त - प्राणाय त्रीणि - पूष्णे चत्वार्यु - दस्यैकादश - यास्ते सप्ता - ग्निर् द्ध्रुवसीः दैकान्न वि॒ँशतिर् - भूरूद्ध्र्व स्त्रि॒ँशतद् - भूर् मयि षोडश - यास्ते घोरा नव - स्निक्चाष्टौ - धुनिश्च द्वे - उग्रश्च त्रीण्य - होरात्रे पञ्च - खट् त्रीणि - विगाः सप्तदशा - सृन् मुखः चत्वारि - यदेतद् वृकसः पञ्च - यदीषित श्चत्वारि - दीर्घमुखि त्रीणी - त्था च्चत्वारि - यदेतद् भूतानि षट् - प्रसार्य त्रीण्य - त्रिणा दशा- हरावद्य - ब्रह्मणा षट्थ् षड् - उत्तुदाष्टौ - भूः षट् - पृथिव्यष्ट षष्टिः - शन्नः सप्तपञ्चाशद् द्विचत्वारि॒ँशत् )

**Korvai with starting Padams of 1, 11, 21 Series of Dasinis :-**

(नमो॑ वा॒चे – ब्रह्म॑न् प्र॒व॑र्ग्ये॒ण – म॒यि रु – ग॒न्तरि॑क्षेण – पि॒ता

नो॑ऽसि – म॒ही॒ना – मु॑प नो॒ – य॒दे॒तद् – भूर् – द्यू॒भि श्च॑तुर्

नवतिः)

॥ हरि॑ः ओम् ॥

**॥ कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे आरण्यके**

**सप्तमः प्रपाठकः समाप्तः ॥**

## Appendix (of expansions)

**T.A.7.11.2 – अनुनोऽद्यानुमतिः{1} , अन्विदनुमते त्वम् {2}**

अनु नोऽद्याऽनुमतिर्यज्ञं देवेषु मन्यतां ।

अग्निश्च हव्यवाहनो भवतां दाशुषे मयः ॥ {1}

अन्विदनुमते त्वं मन्यासै शञ्चनः कृधि ।

क्रत्वे दक्षाय नो हिनु प्रण आयू्ँषि तारिषः ॥ {2}

**(Both {1} and {2} appearing in TS 3.3.11.3 and 3.3.11.4)**

---------------------------------------------------------------

**T.A.7.11.9 – उद्वयन्तमसस्पारि {3} , उदुत्यं चित्रम् {4}**

उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरं ।

देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं ॥ {3}

**({3} appearing in T.S.4.1.7.4)**

उदु त्यं जातवेदसं देवँवहन्ति केतवः । दृशे विश्वाय सूर्यं ।

चित्रं देवाना–मुदगादनीकं चक्षु र्मित्रस्य वरुणस्याऽग्नेः ॥ {4}

**({4} appearing in T.S.1.4.43.1)**

**T.A.7.20.2 – पुनरूर्जा{5}, सह रय्या {6}**

पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि विश्वतः ॥ {5}

सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया ।
विश्वफ्स्निया विश्वतस्परि ॥ {6}

**(Both {5} and {6] appearing in T.S.1.5.3.3)**

-----------------------------------------------------------------

**T.A.7.20.3 – इमम् मे वरुण{7}, तत्त्वा यामि{8}**

इमं मे वरुण श्रुधी हवमद्या च मृडय ।
त्वामवस्युरा चके ॥ {7}

तत्त्वा यामि ब्रह्मणा वन्दमान–स्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोद्ध्युरुश॑ꣳस मा न आयुः प्रमोषीः ॥ {8}

**(Both {7} and {8] appearing in T.S.2.1.11.6)**

-----------------------------------------------------------------

**T.A.7.20.3 – त्वन्नो अग्ने{9}, स त्वन्नो अग्ने{10}**

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासि सीष्ठाः ।
यजिष्ठो वह्नि तमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ {9}

स त्वंनो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि ॥ {10}

**(Both {9} and {10} appearing in T.S.2.5.12.3)**

---

## T.A.7.20.3 – त्वमग्ने अयासि{11)

त्वमग्ने अयाऽसि । अया सन्मनसा हितः । अया सन्.हव्यमूहिषे ।
अया नो धेहि भेषजम् । इष्टो अग्निराहुतः । स्वाहाकृतः पिपर्तु नः ।
स्वगा देवेभ्य इदं नमः ॥ {11}

**({11} appearing in T.B.2.4.1.9 )**

---

## T.A.7.20.3 – उद्वयन्तमसस्परि {12} , उदुत्यं{13}, चित्रम् {14}

**{12}, {13} and {14} is same as {3} and {4} above**

---

## T.A.7.20.3 – वयः सुपर्णाः {15}

वयः सुपर्णा उपसेदुरिन्द्रम् । प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुः । मुमुग्ध्यस्मान् निधयेव बद्धान् ॥ {15}

**({15} appearing in T.B.2.5.8.3)**

---

## Details of Dasini&Vaakyams for - Prapaatakam7- TA 7

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 1 | 4 |
| Anuvakam 2 | 6 | 59 |
| Anuvakam 3 | 3 | 36 |
| Anuvakam 4 | 1 | 12 |
| Anuvakam 5 | 7 | 71 |
| Anuvakam 6 | 3 | 29 |
| Anuvakam 7 | 5 | 52 |
| Anuvakam 8 | 5 | 49 |
| Anuvakam 9 | 4 | 38 |
| Anuvakam 10 | 6 | 57 |
| Anuvakam 11 | 9 | 88 |
| Anuvakam 12 | 1 | 4 |
| Anuvakam 13 | 1 | 7 |
| Anuvakam 14 | 1 | 7 |
| Anuvakam 15 | 1 | 3 |
| Anuvakam 16 | 1 | 4 |
| Anuvakam 17 | 1 | 11 |
| Anuvakam 18 | 1 | 7 |
| Anuvakam 19 | 1 | 19 |
| Anuvakam 20 | 3 | 30 |
| Anuvakam 21 | 1 | 16 |
| Anuvakam 22 | 1 | 9 |

| | | |
|---|---|---|
| **Anuvakam 23** | **1** | **8** |
| **Anuvakam 24** | **1** | **2** |
| **Anuvakam 25** | **1** | **3** |
| **Anuvakam 26** | **1** | **5** |
| **Anuvakam 27** | **1** | **3** |
| **Anuvakam 28** | **1** | **17** |
| **Anuvakam 29** | **1** | **4** |
| **Anuvakam 30** | **1** | **5** |
| **Anuvakam 31** | **1** | **4** |
| **Anuvakam 32** | **1** | **3** |
| **Anuvakam 33** | **1** | **4** |
| **Anuvakam 34** | **1** | **6** |
| **Anuvakam 35** | **1** | **3** |
| **Anuvakam 36** | **1** | **10** |
| **Anuvakam 37** | **1** | **6** |
| **Anuvakam 38** | **1** | **6** |
| **Anuvakam 39** | **1** | **8** |
| **Anuvakam 40** | **1** | **6** |
| **Anuvakam 41** | **7** | **68** |
| **Anuvakam 42** | **6** | **57** |
| **Total →** | **94** | **840** |

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

# 8 कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यके अष्टमः प्रपाठकः

## 8.1 अष्टमः प्रपाठकः

अनुवाकम् – 1

**T.A.8.1.1**

देवा वै सत्रमासत । ऋद्धिपरिमितम् यशस्कामाः । तेऽब्रुवन्न् ।

यन्नः प्रथमं यश ऋच्छात् । सर्वेषा–न्नस्तथ्–सहासदिति ।

तेषाम् कुरुक्षेत्रं वेदिरासीत् । तस्यै खाण्डवो दक्षिणार्द्ध आसीत् ।

तूर्घ्नमुत्तरार्द्धः । परीणज्जघनार्द्धः । मरव उत्करः । **1 (10)**

**T.A.8.1.2**

तेषाम् मखं वैष्णवं यश आर्च्छत् । तन्न्यकामयत । तेनापाक्रामत् ।

तम् देवा अन्वायन्न् । यशोऽवरुरुथ्समानाः । तस्यान्वागतस्य ।

सव्याद्धनुरजायत । दक्षिणादिषवः । तस्मादिषुधन्वम् पुण्यजन्म ।

यज्ञजन्मा हि । **2 (10)**

**T.A.8.1.3**

तमेक॒ꣳ॒ सन्त॑म् । ब॒ह॒वो॒ नाभ्य॑धृष्णुवन्न् । तस्मा॒देक॑मिषु॒धन्वि॑नम् ।

ब॒ह॒वो॑ऽनिषु॒धन्वा नाभिधृष्णुवन्ति । सो॑ऽस्मयत ।

एक॑म् मा॒ सन्त॑म् ब॒ह॒वो॒ नाभ्य॑धर्.षिषु॒रि॑ति ।

तस्य॑ सिष्मिया॒णस्य॒ तेजो॑ऽपाक्रामत् । तद्–दे॒वा ओषधीषु॒ न्यमृजुः ।

ते श्या॒मा॑का अभवन्न् । स्म॒या॒का॒ वै नामै॒ते । 3 (10)

**T.A.8.1.4**

तथ् स्म॒याका॑नाꣳ स्मयाक॒त्वम् । तस्मा॑द्–दीक्षि॒ते॑ना॒पिगृह्य॑ स्मे॒तव्य॑म् ।

तेज॑सो॒ धृत्यै॑ । स ध॒नुः प्रति॒ष्कभ्या॑तिष्ठत् ।

ता उ॒प॑दी॒का अब्रु॒वन्–वर॑म्ँ वृणामहै । अथ व इ॒मꣳ॒ रन्धयाम ।

य॒त्र॑ क्व॒ च॑ खनाम । त॒दपो॑ऽभितृ॒णदा॑मे॒ति ।

तस्मा॑दु॒प॒दी॒का य॒त्र॑ क्व॒ च॑ खनन्ति । त॒दपो॑ऽभि॒तृन्दन्ति । 4 (10)

**T.A.8.1.5**

वा॑रेवृ॒त॒ꣳ ह्या॑साम् । तस्य॒ ज्याम॑प्यादन्न् ।

तस्य॒ ध॒नु॑र्वि॒प्रव॑मा॒ण॒ꣳ॒ शि॒र उ॑दवर्तयत् ।

तद् द्या॑वापृथि॒वी अनु॒प्रा॑वर्तत । यत् प्रावर्तत ।

तत् प्रवर्ग्यस्य प्रवर्ग्यत्वम् । यद्घ्राँ(4) इत्यपतत् ।

तद्घर्मस्य घर्मत्वम् । महतो वीर्यमपप्तदिति ।

तन् महावीरस्य महावीरत्वम् । **5 (10)**

**T.A.8.1.6**

यदस्याः समभरन्न् । तथ् सम्राज़ः सम्राट्त्वम् ।

त७ स्तृतम् देवतास्त्रेधा व्यगृह्णत । अग्निः प्रातस्सवनम् ।

इन्द्रो माद्ध्यन्दिन७् सवनम् । विश्वे देवास्तृतीयसवनम् ।

तेनापशीर्ष्णा यज्ञेन यजमानाः । नाशिषोऽवारुन्धत ।

न सुवर्गं ँल्लोकमभ्यजयन्न् । ते देवा अश्विनावब्रुवन्न् । **6 (10)**

**T.A.8.1.7**

भिषजौ वै स्थः । इदं ँयज्ञस्य शिरः प्रतिधत्तमिति ।

तावब्रूतां ँवरम् ँवृणावहै । ग्रह एव नावत्रापि गृह्यतामिति ।

ताभ्या-मेतमाश्विन-मगृह्णन्न् । तावेतद्-यज्ञस्य शिरः प्रत्यधत्ताम् ।

यत् प्रवर्ग्यः । तेन सशीर्ष्णा यज्ञेन यजमानाः । अवाशिषोऽरुन्धत ।

अभि सुवर्गं ँल्लोकमजयन्न् ( ) । यत् प्रवर्ग्यम् प्रवृणक्ति ।

यज्ञस्यैव तच्छिरः प्रतिदधाति । तेन सशीर्ष्णा यज्ञेन यजमानः ।

अवाशिषो रुन्धे । अभि सुवर्गं ँलोकम् जयति ।

तस्मादेष आश्विनप्रवया इव । यत् प्रवर्ग्यः ॥ **7 (17)**

*(उत्करो - ह्ये - ते - तृन्दन्ति - महावीरत्व - मब्रुवन् - नजयन्थ् सप्त च) (A1)*

<u>अनुवाकम् - 2</u>

**<u>T.A.8.2.1</u>**

सावित्रम् जुहोति प्रसूत्यै । चतुर्गृहीतेन जुहोति ।

चतुष्पादः पशवः । पशूनेवावरुन्धे । चतस्रो दिशः ।

दिक्ष्वेव प्रतितिष्ठति । छन्दाꣳसि देवेभ्योऽपाक्रामन्न् ।

न वोऽभागानि हव्यं ँवक्ष्याम इति ।

तेभ्य एत-च्चतुर्गृहीत-मधारयन्न् । पुरोनुवाक्यायै याज्यायै । **8 (10)**

**<u>T.A.8.2.2</u>**

देवतायै वषट्काराय । यच्चतुर्गृहीतम् जुहोति ।

छन्दाꣳस्येव तत् प्रीणाति । तान्यस्य प्रीतानि देवेभ्यो हव्यं ँवहन्ति ।

ब्रह्मवादिनो वदन्ति ।

होतव्यम् दीक्षितस्य गृहा(3) इ न होतव्या(3) मिति ।

हविर्वै दीक्षितः । यज्जुहुयात् । हविष्कृतं ँयजमानमग्नौ प्रदद्ध्यात् ।

यन्न जुहुयात् । **9 (10)**

**T.A.8.2.3**

यज्ञपरुरन्तरियात् । यजुरेव वदेत् ।

न हविष्कृतं ँयजमानमग्नौ प्रदधाति । न यज्ञपरुरन्तरेति ।

गायत्री छन्दाᳲस्यत्यमन्यत ।

तस्यै वषट्कारोऽभ्यय्य शिरोऽच्छिनत् । तस्यै द्वेधा रसः पराऽपतत् ।

पृथिवीमर्द्धः प्राविशत् । पशूनर्द्धः । यः पृथिवीम् प्राविशत् । **10 (10)**

**T.A.8.2.4**

स खदिरोऽभवत् । यः पशून् । सोऽजाम् । यत्खादिर्यभ्रिर् भवति ।

छन्दसामेव रसेन यज्ञस्य शिरः सम्भरति । यदौदुम्बरी ।

ऊर्ग्वा उदुम्बरः । ऊर्जैव यज्ञस्य शिरः सम्भरति ।

यद्–वैणवी । तेजो वै वेणुः । **11 (10)**

**T.A.8.2.5**

तेजसैव यज्ञस्य शिरः सम्भरति । यद्–वैकङ्कती । भा एवावरुन्धे ।

देवस्य त्वा सवितुः प्रसव इत्यभ्रिमादत्ते प्रसूत्यै ।

अश्विनोर्-बाहुभ्यामित्याह । अश्विनौ हि देवानामद्ध्वर्यू आस्ताम् ।

पूष्णो हस्ताभ्यामित्याह यत्यै । वज्र इव वा एषा । यदभ्रिः ।

अभ्रिरसि नारिरसीत्याह शान्त्यै । **12 (10)**

**T.A.8.2.6**

अद्ध्वरकृद्-देवेभ्य इत्याह । यज्ञो वा अद्ध्वरः ।

यज्ञकृद्-देवेभ्य इति वावैतदाह । उत्तिष्ठ ब्रह्मणस्पत इत्याह ।

ब्रह्मणैव यज्ञस्य शिरोऽच्छैति । प्रैतु ब्रह्मणस्पतिरित्याह ।

प्रेत्यैव यज्ञस्य शिरोऽच्छैति । प्र देव्येतु सूनृतेत्याह ।

यज्ञो वै सूनृता । अच्छा वीरन्नर्यम् पङ्क्तिराधसमित्याह । **13 (10)**

**T.A.8.2.7**

पाङ्क्तो हि यज्ञः । देवा यज्ञन्नयन्तु न इत्याह ।

देवानेव यज्ञनियः कुरुते ।

देवी द्यावापृथिवी अनु मे मꣳसाथामित्याह ।

आभ्यामेवानुमतो यज्ञस्य शिरः सम्भरति ।

ऋद्ध्यासमद्य मखस्य शिर इत्याह । यज्ञो वै मखः ।

ऋद्ध्यासमद्य यज्ञस्य शिर इति वावैतदाह ।

मखाय त्वा मखस्य त्वा शीर्ष्ण इत्याह ।

निर्दिश्यैवैनद्धरति । **14 (10)**

**T.A.8.2.8**

त्रिर्.हरति । त्रय इमे लोकाः ।

एभ्य एव लोकेभ्यो यज्ञस्य शिरः सम्भरति ।

तूष्णीम् चतुर्थꣳ हरति । अपरिमितादेव यज्ञस्य शिरः सम्भरति ।

मृत्खनादग्रे हरति । तस्मान् मृत्खनः करुण्यतमः ।

इयत्यग्र आसीरित्याह । अस्यामेवाछम्बट्कारं ँयज्ञस्य शिरः सम्भरति ।

ऊर्जम् ँवा एतꣳ रसम् पृथिव्या उपदीका उद्दिहन्ति । **15 (10)**

**T.A.8.2.9**

यद्-वल्मीकम् । यद्-वल्मीकवपा सम्भारो भवति ।

ऊर्जमेव रसम् पृथिव्या अवरुन्धे । अथो श्रोत्रमेव ।

श्रोत्रꣳ ह्येतत् पृथिव्याः । यद्-वल्मीकः । अबधिरो भवति ।

य एवं ँवेद । इन्द्रो वृत्राय वज्रमुदयच्छत् ।

स यत्रयत्र पराक्रमत । **16 (10)**

**T.A.8.2.10**

तन्नाद्ध्रियत । स पूतीकस्तम्बे पराक्रमत । सोऽद्ध्रियत । सोऽब्रवीत् ।

ऊतिं वै मे धा इति । तदूतीकाना-मूतीकत्वम् । यदूतीका भवन्ति ।

यज्ञायैवोतिम् दधति । अग्निजा असि प्रजापते रेत इत्याह ।

य एव रसः पशून् प्राविशत् । **17 (10)**

**T.A.8.2.11**

तमेवावरुन्धे । पञ्चैते सम्भारा भवन्ति । पाङ्क्तो यज्ञः ।

यावानेव यज्ञः । तस्य शिरः सम्भरति ।

यद्ग्राम्याणाम् पशूनाञ्चर्मणा सम्भरेत् । ग्राम्यान् पशूञ्छुचाऽर्पयेत् ।

कृष्णाजिनेन सम्भरति । आरण्यानेव पशूञ्छुचाऽर्पयति ।

तस्माथ्-समावत्-पशूनाम् प्रजायमानानाम् । **18 (10)**

**T.A.8.2.12**

आरण्याः पशवः कनीयाꣳसः । शुचा ह्यृताः । लोमतः सम्भरति ।

अतो ह्यस्य मेद्ध्यम् । परिगृह्या यन्ति । रक्षसामपहत्यै ।

बहवो हरन्ति । अपचितिमेवास्मिन् दधति ।

उद्धते सिकतोपोप्ते परिश्रिते निदधति शान्त्यै ।

मदन्तीभिरुप सृजति । **19 (10)**

**T.A.8.2.13**

तेज एवास्मिन् दधाति । मधु त्वा मधुला करोत्वित्याह ।

ब्रह्मणैवास्मिन् –तेजो दधाति ।

यद्ग्राम्याणाम् पात्राणाम् कपालैः स(ं)सृजेत् ।

ग्राम्याणि पात्राणि शुचाऽर्पयेत् । अर्मकपालैः स(ं)सृजति ।

एतानि वा अनुपजीवनीयानि । तान्येव शुचाऽर्पयति ।

शर्कराभिः स(ं)सृजति धृत्यै । अथो शन्त्वाय ( ) ।

अजलोमैः स(ं)सृजति । एषा वा अग्नेः प्रिया तनूः ।

यदजा । प्रिययैवैनम् तनुवा स(ं)सृजति । अथो तेजसा ।

कृष्णाजिनस्य लोमभिः स(ं)सृजति । यज्ञो वै कृष्णाजिनम् ।

यज्ञेनैव यज्ञ(ं) स(ं)सृजति ॥ **20 (18)**

*(याजायै - न जुहुया - दविशद् - वेणुः - शान्त्यै - पङ्क्तिराधसमित्याह - हरति - दिहन्ति - पराक्रम - ताविशत् - प्रजायमानानाꣳ - सृजति - शन्त्वाया ष्टौ च) (A2)*

अनुवाकम् - 3

**T.A.8.3.1**

परिश्रिते करोति । ब्रह्मवर्चसस्य परिगृहीत्यै । न कुर्वन्नभि प्राण्यात् । यत् कुर्वन्नभि प्राण्यात् । प्राणाञ्छुचाऽर्पयेत् । अपहाय प्राणिति । प्राणानाम् गोपीथाय । न प्रवर्ग्यम्-चादित्यम्-चान्तरेयात् । यदन्तरेयात् । दुश्चर्मा स्यात् । **21 (10)**

**T.A.8.3.2**

तस्मान्नान्तराय्यम् । आत्मनो गोपीथाय । वेणुना करोति । तेजो वै वेणुः । तेजः प्रवर्ग्यः । तेजसैव तेजः समर्द्धयति । मखस्य शिरोऽसीत्याह । यज्ञो वै मखः । तस्यैतच्छिरः । यत् प्रवर्ग्यः । **22 (10)**

**T.A.8.3.3**

तस्मादेवमाह । यज्ञस्य पदे स्थ इत्याह । यज्ञस्य ह्येते पदे ।

अथो प्रतिष्ठित्यै । गायत्रेण त्वा छन्दसा करोमीत्याह ।

छन्दोभिरेवैनम् करोति । त्र्युद्धिम् करोति । त्रय इमे लोकाः ।

एषाम् ँलोकानामाप्त्यै । छन्दोभिः करोति । **23 (10)**

**T.A.8.3.4**

वीर्यम् ँवै छन्दा॑ँसि । वीर्येणैवैनम् करोति ।

यजुषा बिलम् करोति व्यावृत्त्यै । इयन्तम् करोति ।

प्रजापतिना यज्ञमुखेन सम्मितम् । इयन्तम् करोति ।

यज्ञपरुषा सम्मितम् । इयन्तम् करोति ।

एतावद्वै पुरुषे वीर्यम् । वीर्यसम्मितम् । **24 (10)**

**T.A.8.3.5**

अपरिमितम् करोति । अपरिमितस्यावरुद्ध्यै । परिग्रीवम् करोति धृत्यै ।

सूर्यस्य हरसा श्रायेत्याह । यथायजुरेवैतत् । अश्वशकेन धूपयति ।

प्राजापत्यो वा अश्वः सयोनित्वाय । वृष्णो अश्वस्य निष्पदसीत्याह ।

असौ वा आदित्यो वृषाऽश्वः । तस्य छन्दा॑ँसि निष्पत् । **25 (10)**

**T.A.8.3.6**

छन्दोभिरेवैनम् धूपयति । अर्चिषे त्वा शोचिषे त्वेत्याह ।

तेज एवास्मिन् दधाति । वारुणोऽभीद्धः । मैत्रियोपैति शान्त्यै ।

सिद्ध्यै त्वेत्याह । यथायजुरेवैतत् । देवस्त्वा सवितोद्वपत्वित्याह ।

सवितृप्रसूत एवैनम् ब्रह्मणा देवताभिरुद्वपति ।

अपद्यमानः पृथिव्यामाशा दिश आपृणेत्याह । **26 (10)**

**T.A.8.3.7**

तस्मादग्निः सर्वा दिशोऽनु विभाति ।

उत्तिष्ठ बृहन्-भवोद्ध्वस्तिष्ठ ध्रुवस्त्वमित्याह प्रतिष्ठित्यै ।

ईश्वरो वा एषोऽन्धो भवितोः ।

यः प्रवर्ग्यमन्वीक्षते । सूर्यस्य त्वा चक्षुषाऽन्वीक्ष इत्याह ।

चक्षुषो गोपीथाय ।

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा भूत्यै त्वेत्याह । इयं ँवा ऋजुः ।

अन्तरिक्षꣳ साधु । असौ सुक्षितिः । **27 (10)**

**T.A.8.3.8**

दिशो भूतिः । इमानेवास्मै लोकान् कल्पयति । अथो प्रतिष्ठित्यै ।

इद–मह–ममुमामुष्यायणम् ँविशा पशुभिर्–ब्रह्मवर्चसेन

पर्यूहामीत्याह ।

विशैवैनम् पशुभिर्–ब्रह्मवर्चसेन पर्यूहति ।

विशेति राजन्यस्य ब्रूयात् । विशैवैनम् पर्यूहति । पशुभिरिति वैश्यस्य ।

पशुभिरेवैनम् पर्यूहति । असुर्यम् पात्रमनाच्छृण्णम् । **28 (10)**

**T.A.8.3.9**

आच्छृणत्ति । देवत्राऽकः । अजक्षीरेणाच्छृणत्ति ।

परमं ँवा एतत् पयः । यदजक्षीरम् । परमेणैवैनम् पयसाऽऽच्छृणत्ति ।

यजुषा व्यावृत्त्यै । छन्दोभिराच्छृणत्ति । छन्दोभिर्वा एष क्रियते ।

छन्दोभिरेव छन्दा॑ᳪस्याच्छृणत्ति ( ) । छृन्धि वाचमित्याह ।

वाचमेवावरुन्धे । छृन्ध्यूर्जमित्याह । ऊर्जमेवावरुन्धे ।

छृन्धि हविरित्याह । हविरेवाकः । देव पुरश्चर सघ्यासन्त्वेत्याह ।

यथायजुरेवैतत् ॥ **29 (18)**

*(स्याद्- यत् प्रवर्ग्यः - छन्दोभिः करोति - वीर्यं सम्मितम् - छन्दाꣳसि निष्पत् - पृणेत्याह - सुक्षिति - रनाच्छृण्णम् - छन्दाꣳस्याच्छृण त्यष्टौ च) (A3)*

अनुवाकम् - 4

**T.A.8.4.1**

ब्रह्मन् प्रचरिष्यामो होतर्-घर्ममभिष्टुहीत्याह ।

एष वा एतर्.हि बृहस्पतिः । यद्ब्रह्मा ।

तस्मा एव प्रतिप्रोच्य प्रचरति ।

आत्मनोऽनार्त्यै । यमाय त्वा मखाय त्वेत्याह ।

एता वा एतस्य देवताः । ताभिरेवैनꣳ समर्द्धयति ।

मदन्तीभिः प्रोक्षति । तेज एवास्मिन् दधाति । **30 (10)**

**T.A.8.4.2**

अभिपूर्वम् प्रोक्षति । अभिपूर्व-मेवास्मिन्-तेजो दधाति ।

त्रिः प्रोक्षति । त्र्यावृद्धि यज्ञः । अथो मेद्ध्यत्वाय । होताऽन्वाह ।

रक्षसामपहत्यै । अनवानम् । प्राणानाꣳ सन्तत्यै ।

त्रिष्टुभः सतीर्-गायत्रीरिवान्वाह । **31 (10)**

**T.A.8.4.3**

गायत्रो हि प्राणः । प्राणमेव यजमाने दधाति । सन्ततमन्वाह ।
प्राणानामन्नाद्यस्य सन्तत्यै । अथो रक्षसामपहत्यै ।
यत् परिमिता अनुब्रूयात् । परिमितमवरुन्धीत । अपरिमिता अन्वाह ।
अपरिमितस्यावरुद्ध्यै । शिरो वा एतद्-यज्ञस्य । **32 (10)**

**T.A.8.4.4**

यत् प्रवर्ग्यः । ऊङ्र्मुञ्जाः । यन् मौञ्जो वेदो भवति ।
ऊर्जैव यज्ञस्य शिरः समर्द्धयति । प्राणाहुतीर्-जुहोति ।
प्राणानेव यजमाने दधाति । सप्त जुहोति ।
सप्त वै शीर्.षण्याः प्राणाः । प्राणानेवास्मिन् दधाति ।
देवस्त्वा सविता मद्ध्वाऽनक्त्वित्याह । **33 (10)**

**T.A.8.4.5**

तेजसैवैनमनक्ति । पृथिवीम् तपसस्त्रायस्वेति हिरण्यमुपास्यति ।
अस्या अनतिदाहाय । शिरो वा एतद्-यज्ञस्य । यत् प्रवर्ग्यः ।
अग्निः सर्वा देवताः । प्रलवानादीप्योपास्यति ।

देवतास्वेव यज्ञस्य शिरः प्रतिदधाति । अप्रतिशीर्णाग्रम् भवति ।

एतद्–बर्हिर्ह्येषः । **34 (10)**

**T.A.8.4.6**

अर्चिरसि शोचिरसीत्याह । तेज एवास्मिन् ब्रह्मवर्चसम् दधाति ।

स॒ꣳसीदस्व महा॒ꣳ असीत्याह । महान्. ह्येषः । ब्रह्मवादिनो वदन्ति ।

एते वाव त ऋत्विजः । ये दर्.शपूर्णमासयोः ।

अथ कथा होता यजमानायाशिषो नाशास्त इति ।

पुरस्तादाशीः खलु वा अन्यो यज्ञः । उपरिष्टादाशीरन्यः । **35 (10)**

**T.A.8.4.7**

अनाधृष्या पुरस्तादिति यदेतानि यजू॒ꣳष्याह ।

शीर्.षत एव यज्ञस्य यजमान आशिषोऽवरुन्धे । आयुः पुरस्तादाह ।

प्रजाम् दक्षिणतः । प्राणम् पश्चात् । श्रोत्रमुत्तरतः । विधृतिमुपरिष्टात् ।

प्राणानेवास्मै समीचो दधाति । ईश्वरो वा एष दिशोऽनून्मदितोः ।

यन्दिशोऽनु व्यास्थापयन्ति । **36 (10)**

**T.A.8.4.8**

मनोरश्वाऽसि भूरिपुत्रेतीमा–मभिमृशति । इयं ँवै मनोरश्वा भूरिपुत्रा ।

अस्यामेव प्रतितिष्ठत्यनुन्मादाय ।

सूपसदा मे भूया मा मा हि॒ꣳसीरित्याहाहि॒ꣳसायै ।

चितः स्थ परिचित इत्याह ।

अपचितिमेवास्मिन् दधाति । शिरो वा एतद्–यज्ञस्य । यत् प्रवर्ग्यः ।

असौ खलु वा आदित्यः प्रवर्ग्यः । तस्य मरुतो रश्मयः । **37 (10)**

**T.A.8.4.9**

स्वाहा मरुद्भिः परिश्रयस्वेत्याह । अमुमेवादित्यꣳ रश्मिभिः पर्यूहति ।

तस्मा–दसावादित्योऽमुष्मिन् ँलोके रश्मिभिः पर्यूढः ।

तस्माद्–राजा विशा पर्यूढः । तस्माद्–ग्रामणीः सजातैः पर्यूढः ।

अग्नेः सृष्टस्य यतः । विकङ्कतम् भा आर्च्छत् ।

यद् वैकङ्कताः परिधयो भवन्ति ।

भा एवावरुन्धे । द्वादश भवन्ति । **38 (10)**

**T.A.8.4.10**

द्वादश मासाः सम्ँवथ्सरः । सम्ँवथ्सरमेवावरुन्धे ।

अस्ति त्रयोदशो मास इत्याहुः । यत् त्रयोदशः परिधिर्भवति ।

तेनैव त्रयोदशम् मासमवरुन्धे ।

अन्तरिक्षस्यान्तर्–द्धिरसीत्याह व्यावृत्त्यै ।

दिवम् तपसस्त्रायस्वे–त्युपरिष्टा–द्धिरण्यमधि निदधाति ।

अमुष्या अनतिदाहाय । अथो आभ्यामेवैनमुभयतः परिगृह्णाति ।

अर्.हन् बिभर्.षि सायकानि धन्वेत्याह । **39 (10)**

**T.A.8.4.11**

स्तौत्येवैनमेतत् । गायत्रमसि त्रैष्टुभमसि जागतमसीति धवित्राण्यादत्ते ।

छन्दोभिरेवैनान्यादत्ते । मधु मद्ध्विति धूनोति । प्राणो वै मधु ।

प्राणमेव यजमाने दधाति । त्रिः परियन्ति । त्रिवृद्धि प्राणः ।

त्रिः परियन्ति । त्र्यावृद्धि यज्ञः । **40 (10)**

**T.A.8.4.12**

अथो रक्षसामपहत्यै । त्रिः पुनः परियन्ति ।

षट्थ् सम्पद्यन्ते । षड्वा ऋतवः । ऋतुष्वेव प्रतितिष्ठन्ति ।

यो वै घ॒र्मस्य॑ प्रि॒यान्–त॒नुव॑मा॒क्राम॑ति । दु॒श्चर्मा॒ वै स भ॑वति ।
ए॒ष ह॒ वा अ॑स्य प्रि॒यान् त॒नु॒वमाक्रा॑मति ।
य स्त्रिः प॒रीत्य॑ चतु॒र्थम् प॒र्येति ।
ए॒ता॑ ह॒ वा अ॑स्यो॒ग्रदे॑वो॒ राज॑नि॒राचक्राम । 41 (10)

**T.A.8.4.13**

तत॒ो वै स दु॒श्चर्मा॑ऽभवत् । तस्मा॒त् त्रिः प॒रीत्य॒ न च॑तु॒र्थम् परीयात् ।
आ॒त्मनो॑ गोपी॒थाय॑ । प्रा॒णा वै ध॒वित्रा॑णि । अव्य॑तिषङ्गम् धून्वन्ति ।
प्रा॒णाना॒–मव्य॑तिषङ्गा॒य क्लृप्त्यै॑ । वि॒नि॒षद्य धून्वन्ति ।
दि॒क्ष्वे॑व प्र॑तितिष्ठन्ति । ऊ॒द्ध्वर्वन्धू॑न्वन्ति ।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै ( ) । स॒र्वतो॑ धून्वन्ति ।
तस्मा॒दय॑ स॒र्व॑तः पवते ॥ 42 (12)

*(द॒धा॒– ती॒वान्वा॑ह – य॒ज्ञ – स्या॒है॑ – ष – उ॒परिष्टादाशी॒रन्यो –*
*व्यास्था॒पयन्ति – र॒श्मयो॑ – भव॒न्ति – धन्वेत्याह – य॒ज्ञ –*
*श्च॑क्रा॒म – सम॑ष्ट्यै॒ द्वे च॑) (A4)*

## अनुवाकम् – 5

**T.A.8.5.1**

अग्निष्ट्वा वसुभिः पुरस्ताद्-रोचयतु गायत्रेण छन्दसेत्याह ।

अग्निरेवैनं वसुभिः पुरस्ताद्-रोचयति गायत्रेण छन्दसा ।

स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते ।

इन्द्रस्त्वा रुद्रैर्-दक्षिणतो रोचयतु त्रैष्टुभेन छन्दसेत्याह ।

इन्द्र एवैनꣳ रुद्रैर्-दक्षिणतो रोचयति त्रैष्टुभेन छन्दसा ।

स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते ।

वरुणस्त्वाऽऽदित्यैः पश्चाद्-रोचयतु जागतेन छन्दसेत्याह ।

वरुण एवैनमादित्यैः पश्चाद्-रोचयति जागतेन छन्दसा । **43 (10)**

**T.A.8.5.2**

स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते ।

द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसेत्याह ।

द्युतान एवैनम् मारुतो मरुद्भिरुत्तरतो रोचयत्यानुष्टुभेन छन्दसा ।

स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते ।

बृहस्पतिस्त्वा विश्वैर्-देवैरुपरिष्टाद्-रोचयतु पाङ्क्तेन छन्दसेत्याह ।

बृहस्पतिरेवैनम् ँविश्वैर्–देवैरुपरिष्टाद्–रोचयति पाङ्क्तेन छन्दसा ।
स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । **44 (10)**

**T.A.8.5.3**

रोचितस्त्वम् देव घर्म देवेष्वसीत्याह । रोचितो ह्येष देवेषु ।
रोचिषीयाहम् मनुष्येष्वित्याह । रोचत एवैष मनुष्येषु ।
सम्राड् घर्म रुचितस्त्वन् देवेष्वायुष्मा॑ स्तेजस्वी
ब्रह्मवर्चस्यसीत्याह ।
रुचितो ह्येष देवेष्वायुष्मा॑ स्तेजस्वी ब्रह्मवर्चसी ।
रुचितोऽहम् मनुष्येष्वायुष्मा॑ स्तेजस्वी ब्रह्मवर्चसी भूयासमित्याह ।
रुचित एवैष मनुष्येष्वायुष्मा॑ स्तेजस्वी ब्रह्मवर्चसी भवति ।
रुगसि रुचम् मयि धेहि मयि रुगित्याह । आशिषमेवैतामाशास्ते ( ) ।
तं ँयदेतैर्–यजुर्भिररोचयित्वा । रुचितो घर्म इति प्रब्रूयात् ।
अरोचुकोऽद्ध्वर्युः स्यात् । अरोचुको यजमानः ।
अथ यदेनमेतैर्यजुर्भी रोचयित्वा ।

रुचितो घर्म इति प्राह । रोचुकोऽद्ध्वर्युर् भवति ।

रोचुको यजमानः ॥ **45 (18)**

*(पश्चाद् रोचयति जगतेन छन्दसा – पाङ्क्तेन छन्दसा स मा रुचितो रोचयेत्याहाशिषमेवैतामाशास्ते – शास्ते ऽष्टौ च) (A5)*

<u>अनुवाकम् – 6</u>

**<u>T.A.8.6.1</u>**

शिरो वा एतद्–यज्ञस्य । यत् प्रवर्ग्यः । ग्रीवा उपसदः ।

पुरस्तादुपसदाम् प्रवर्ग्यम् प्रवृणक्ति ।

ग्रीवास्वेव यज्ञस्य शिरः प्रतिदधाति । त्रिः प्रवृणक्ति ।

त्रय इमे लोकाः । एभ्य एव लोकेभ्यो यज्ञस्य शिरोऽवरुन्धे ।

षट्थ् सम्पद्यन्ते । षड्वा ऋतवः । **46 (10)**

**<u>T.A.8.6.2</u>**

ऋतुभ्य एव यज्ञस्य शिरोऽवरुन्धे । द्वादश कृत्वः प्रवृणक्ति ।

द्वादश मासाः सम्ँवथ्सरः । सम्ँवथ्सरादेव यज्ञस्य शिरोऽवरुन्धे ।

चतुर्वि॒ꣳशतिः सम्पद्यन्ते । चतुर्वि॒ꣳशतिरर्द्धमासाः ।

अर्द्धमासेभ्य एव यज्ञस्य शिरोऽवरुन्धे । अथो खलु ।

सकृदेव प्रवृज्यः । एकꣳ हि शिरः । **47 (10)**

**T.A.8.6.3**

अग्निष्टोमे प्रवृणक्ति । एतावान्. वै यज्ञः । यावानग्निष्टोमः ।

यावानेव यज्ञः । तस्य शिरः प्रतिदधाति । नोक्थ्ये प्रवृञ्ज्यात् ।

प्रजा वै पशव उक्थानि । यदुक्थ्ये प्रवृञ्ज्यात् ।

प्रजाम् पशूनस्य निर्दहेत् । विश्वजिति सर्वपृष्ठे प्रवृणक्ति । **48 (10)**

**T.A.8.6.4**

पृष्ठानि वा अच्युतञ्च्यावयन्ति ।

पृष्ठैरेवास्मा अच्युतञ्च्यावयित्वाऽवरुन्धे । अपश्यम् गोपामित्याह ।

प्राणो वै गोपाः । प्राणमेव प्रजासु वियातयति ।

अपश्यम् गोपामित्याह ।

असौ वा आदित्यो गोपाः । स हीमाः प्रजा गोपायति ।

तमेव प्रजानाम् गोप्तारम् कुरुते । अनिपद्यमानमित्याह । **49 (10)**

**T.A.8.6.5**

न ह्येष निपद्यते । आ च परा च पथिभिश्चरन्तमित्याह ।

आ च ह्येष परा च पथिभिश्चरति ।

स सध्रीचीः स विषूचीर्वसान इत्याह ।

सध्रीचीश्च ह्येष विषूचीश्च वसानः प्रजा अभि विपश्यति ।

आ वरीवर्ति भुवनेष्वन्तरित्याह । आ ह्येष वरीवर्ति भुवनेष्वन्तः ।

अत्र प्रावीर्मधु माध्वीभ्याम् मधु माधूचीभ्यामित्याह ।

वासन्तिकावेवास्मा ऋतू कल्पयति ।

समग्निरग्निना गतेत्याह । **50 (10)**

**T.A.8.6.6**

ग्रैष्मावेवास्मा ऋतू कल्पयति । समग्निरग्निना गतेत्याह ।

अग्निर्ह्येवैषोऽग्निना सङ्गच्छते । स्वाहा समग्निस्तपसा गतेत्याह ।

पूर्वमेवोदितम् । उत्तरेणाभिगृणाति ।

धर्ता दिवो विभासि रजसः पृथिव्या इत्याह ।

वार्.षिकावेवास्मा ऋतू कल्पयति ।

हृदे त्वा मनसे त्वेत्याह । शारदावेवास्मा ऋतू कल्पयति । **51 (10)**

**T.A.8.6.7**

दिवि देवेषु होत्रा यच्छेत्याह । होत्राभिरेवेमान् ँल्लोकान्थ् सम् दधाति ।

विश्वासाम् भुवाम् पत इत्याह । हैमन्तिकावेवास्मा ऋतू कल्पयति ।

देवश्रूस्त्वम् देव घर्म देवान् पाहीत्याह ।

शैशिरावेवास्मा ऋतू कल्पयति ।

तपोजां ँवाचमस्मे नियच्छ देवायुवमित्याह ।

या वै मेद्ध्या वाक् । सा तपोजाः । तामेवावरुन्धे । **52 (10)**

**T.A.8.6.8**

गर्भो देवानामित्याह । गर्भो ह्येष देवानाम् । पिता मतीनामित्याह ।

प्रजा वै मतयः । तासामेष एव पिता । यत् प्रवर्ग्यः । तस्मादेवमाह ।

पतिः प्रजानामित्याह । पतिर्ह्येष प्रजानाम् ।

मतिः कवीनामित्याह । **53 (10)**

**T.A.8.6.9**

मतिर्ह्येष कवीनाम् ।

सम् देवो देवेन सवित्रा ऽयतिष्ट स८ं सूर्येणारुक्तेत्याह ।

अमुञ्चैवादित्यम् प्रवर्ग्यञ्च स८ंशास्ति ।

आयुर्दास्त्वमस्मभ्यम् घर्म वर्चोदा असीत्याह ।
आशिषमेवैतामाशास्ते । पिता नोऽसि पिता नो बोधेत्याह ।
बोधयत्येवैनम् । न वै तेऽवकाशा भवन्ति । पत्नियै दशमः ।
नव वै पुरुषे प्राणाः । **54 (10)**

**T.A.8.6.10**

नाभिर्दशमी । प्राणानेव यजमाने दधाति । अथो दशाक्षरा विराट् ।
अन्नं ँविराट् । विराजैवान्नाद्यमवरुन्धे । यज्ञस्य शिरोऽच्छिद्यत ।
तद्-देवा होत्राभिः प्रत्यदधुः । ऋत्विजोऽवेक्षन्ते । एता वै होत्राः ।
होत्राभिरेव यज्ञस्य शिरः प्रतिदधाति । **55 (10)**

**T.A.8.6.11**

रुचितमवेक्षन्ते । रुचिताद्वै प्रजापतिः प्रजा असृजत ।
प्रजाना७ं सृष्ट्यै । रुचितमवेक्षन्ते । रुचिताद्वै पर्जन्यो वर्.षति ।
वर्.षुकः पर्जन्यो भवति । सम् प्रजा एधन्ते । रुचितमवेक्षन्ते ।
रुचितम् ँवै ब्रह्मवर्चसम् । ब्रह्मवर्चसिनो भवन्ति । **56 (10)**

**T.A.8.6.12**

अधीयन्तोऽवेक्षन्ते । सर्वमायुर्यन्ति । न पत्न्यवेक्षेत । यत् पन्त्यवेक्षेत ।

प्रजायेत । प्रजान्त्वस्यै निर्दहेत् । यन्नावेक्षेत । न प्रजायेत ।

नास्यै प्रजान्निर्दहेत् । तिरस्कृत्य यजुर् वाचयति ( ) । प्रजायते ।

नास्यै प्रजान्निर्दहति । त्वष्टीमती ते सपेयेत्याह ।

सपाद्धि प्रजाः प्रजायन्ते ॥ **57 (14)**

*(ऋतवो – हि शिरः – सर्वपृष्ठे प्रवृण – क्त्यनिपद्यमानमित्याह – गतेत्याह – शारदावेवास्मा ऋतू कल्पयति – रुन्धे – कविनामित्याह – प्राणाः – प्रतिदधाति – भवन्ति – वाचयति चत्वारि च) (A6)*

अनुवाकम् – 7

**T.A.8.7.1**

देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते प्रसूत्यै ।

अश्विनोर्–बाहुभ्यामित्याह । अश्विनौ हि देवानामद्ध्वर्यू आस्ताम् ।

पूष्णो हस्ताभ्यामित्याह यत्यै ।

आददेऽदित्यै रास्नाऽसीत्याह यजुष्कृत्यै ।

इड एह्यदित एहि सरस्वत्येहीत्याह । एतानि वा अस्यै देवनामानि ।

दे॒व॒ना॒मै॒रे॒वै॒ना-माह्वयति । अ॒सा॒वेह्य-सा॒वेह्य-सा॒वेहीत्याह ।
ए॒ता॒नि वा अ॒स्यै मनुष्यना॒मानि । 58 (10)

**T.A.8.7.2**

म॒नु॒ष्य॒ना॒मै॒रे॒वै॒नामाह्वयति । षट्थ् सम्पद्यन्ते । षड्वा ऋ॒तवः ।
ऋ॒तु॒भि॒रे॒वै॒नामाह्वयति । अदित्या उ॒ष्णीष॒मसीत्याह । य॒था॒य॒जु॒रे॒वैतत् ।
वा॒यु॒रस्यै॒ड इत्याह । वा॒यु॒दे॒व॒त्यो वै व॒थ्सः ।
पूषा त्वो॒पाव॒सृजत्वित्याह । पौ॒ष्णा वै दे॒वतया प॒शवः । 59 (10)

**T.A.8.7.3**

स्वयै॒वैनम् दे॒वत॒योपावसृजति । अ॒श्विभ्या॒म् प्रदा॒पयेत्याह ।
अ॒श्वि॒नौ वै दे॒वानाम् भि॒षजौ । ताभ्याम॒वास्मै भेष॒जम् करोति ।
यस्ते॒ स्तनः शश॒य इत्याह । स्तौत्ये॒वैनाम् ।
उस्र घ॒र्मꣳ शि॒ꣳ॒षोस्र घ॒र्मम् पाहि घ॒र्माय शि॒ꣳ॒षेत्याह ।
यथा ब्रू॒या॒दमुष्मै दे॒हीति । ता॒दृ॒गेव तत् ।
बृ॒ह॒स्पति॒स्त्वोपसीद॒त्वित्याह । 60 (10)

**T.A.8.7.4**

ब्रह्म वै देवानाम् बृहस्पतिः । ब्रह्मणैवैनामुपसीदति ।

दानवः स्थ पेरव इत्याह । मेद्ध्यानेवैनान्करोति ।

विष्वग्वृतो लोहितेनेत्याह व्यावृत्त्यै ।

अश्विभ्याम् पिन्वस्व सरस्वत्यै पिन्वस्व पूष्णे पिन्वस्व बृहस्पतये पिन्वस्वेत्याह ।

एताभ्यो ह्येषा देवताभ्यः पिन्वते ।

इन्द्राय पिन्वस्वेन्द्राय पिन्वस्वेत्याह । इन्द्रमेव भागधेयेन समर्द्धयति ।

द्विरिन्द्रायेत्याह । **61 (10)**

**T.A.8.7.5**

तस्मादिन्द्रो देवतानाम् भूयिष्ठभाक्तमः ।

गायत्रोऽसि त्रैष्टुभोऽसि जागतमसीति शफोपयमानादत्ते ।

छन्दोभिरेवैनानादत्ते । सहोर्जो भागेनोपमेहीत्याह ।

ऊर्ज एवैनम् भागमकः ।

अश्विनौ वा एतद्–यज्ञस्य शिरः प्रतिदधतावब्रूताम् ।

आवाभ्यामेव पूर्वाभ्यां ँवषट्क्रियाता इति ।

इन्द्राश्विना मधुनः सारघस्येत्याह ।

अश्विभ्यामेव पूर्वाभ्यां ँवषट्करोति ।

अथो अश्विनावेव भागधेयेन समर्द्धयति । **62 (10)**

**T.A.8.7.6**

घर्मम् पात वसवो यजता वडित्याह ।

वसूनेव भागधेयेन समर्द्धयति । यद्–वषट्कुर्यात् ।

यातयामाऽस्य वषट्कारः स्यात् ।

यन्न वषट्कुर्यात् । रक्षा॒ꣳसि य॒ज्ञꣳ ह॒न्युः । वडित्याह ।

परोक्षमेव वषट्करोति । नास्य यातयामा वषट्कारो भवति ।

न यज्ञꣳ रक्षाꣳसि घ्नन्ति । **63 (10)**

**T.A.8.7.7**

स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमीत्याह ।

यो वा अस्य पुण्यो रश्मिः । स वृष्टिवनिः । तस्मा एवैनम् जुहोति ।

मधु हविरसीत्याह । स्वदयत्येवैनम् । सूर्यस्य तपस्तपेत्याह ।

यथायजुरेवैतत् । द्यावापृथिवीभ्याम् त्वा परिगृह्णामीत्याह ।

द्यावापृथिवीभ्या-मेवैनम् परिगृह्णाति । **64 (10)**

**T.A.8.7.8**

अन्तरिक्षेण त्वोपयच्छामीत्याह । अन्तरिक्षेणैवैन-मुपयच्छति ।

न वा एतम् मनुष्यो भर्तुमर्.हति ।

देवानाम् त्वा पितृणामनुमतो भर्तु॒ꣳ शकेयमित्याह ।

देवैरेवैनम् पितृभिरनुमत आदत्ते ।

वि वा एनमेतदर्द्धयन्ति । यत् पश्चात् प्रवृज्य पुरो जुह्वति ।

तेजोऽसि तेजोऽनु प्रेहीत्याह । तेज एवास्मिन् दधाति ।

दिविस्पृङ्मा मा हि॒ꣳसी-रन्तरिक्षस्पृङ्मा मा हि॒ꣳसीः

पृथिविस्पृङ्मा मा हि॒ꣳसीरित्याहाहि॒ꣳसायै । **65 (10)**

**T.A.8.7.9**

सुवरसि सुवर्मे यच्छ दिवं यँच्छ दिवो मा पाहीत्याह ।

आशिषमेवैतामाशास्ते । शिरो वा एतद्-यज्ञस्य । यत् प्रवर्ग्यः ।

आत्मा वायुः । उद्यत्य वातनामान्याह ।

आत्मन्नेव यज्ञस्य शिरः प्रतिदधाति ।

अनवानम् । प्राणाना॑ सन्तत्यै । पञ्चाह । **66 (10)**

**T.A.8.7.10**

पाङ्क्तो यज्ञः । यावानेव यज्ञः । तस्य शिरः प्रतिदधाति ।

अग्नये त्वा वसुमते स्वाहेत्याह ।

असौ वा आदित्योऽग्निर्-वसुमान् ।

तस्मा एवैनञ्जुहोति । सोमाय त्वा रुद्रवते स्वाहेत्याह ।

चन्द्रमा वै सोमो रुद्रवान् । तस्मा एवैनञ्जुहोति ।

वरुणाय त्वाऽऽदित्यवते स्वाहेत्याह । **67 (10)**

**T.A.8.7.11**

अफ्सु वै वरुण आदित्यवान् । तस्मा एवैनञ्जुहोति ।

बृहस्पतये त्वा विश्वदेव्यावते स्वाहेत्याह ।

ब्रह्म वै देवानाम् बृहस्पतिः ।

ब्रह्मण एवैनञ्जुहोति ।

सवित्रे त्वर्भुमते विभुमते प्रभुमते वाजवते स्वाहेत्याह ।

सम्ँवथ्सरो वै सवितर्भुमान्. विभुमान् प्रभुमान्. वाजवान् ।

तस्मा एवैनञ्जुहोति । यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहेत्याह ।

प्राणो वै यमोऽङ्गिरस्वान् पितृमान् । **68 (10)**

**T.A.8.7.12**

तस्मा एवैनञ्जुहोति । एताभ्य एवैनम् देवताभ्यो जुहोति ।

दश सम्पद्यन्ते । दशाक्षरा विराट् । अन्नं ँविराट् ।

विराजैवान्नाद्यमवरुन्धे । रौहिणाभ्यां ँवै देवाः सुवर्गं ँलोकमायन्न् ।

तद्–रौहिणयो रौहिणत्वम् । यद्–रौहिणौ भवतः ।

रौहिणाभ्यामेव तद्–यजमानः सुवर्गं ँलोकमेति ( ) ।

अहर्ज्योतिः केतुना जुषता॒ सुज्योतिर्ज्योतिषा॒ स्वाहा रात्रिर्ज्योतिः

केतुना जुषता॒ सुज्योतिर्ज्योतिषा॒ स्वाहेत्याह ।

आदित्यमेव तदमुष्मिन् ँलोकेऽह्ना परस्ताद्–दाधार ।

रात्रिया अवस्तात् ।

तस्मादसावादित्यो ऽमुष्मिन् ँलोकेऽहोरात्राभ्याम् धृतः ॥ **69 (14)**

*(मनुष्यनामानि – पशवः – सीदत्वित्या – हेन्द्रायेत्याहा – र्द्धयति – घ्नन्ति – गृह्णा – त्यहिꣳसायै – पञ्चाहा – दित्यवते स्वाहेत्याह – पितृमा – नेति चत्वारि च) (A7)*

अनुवाकम् – 8

**T.A.8.8.1**

विश्वा आशा दक्षिणसदित्याह । विश्वानेव देवान् प्रीणाति ।

अथो दुरिष्ट्या एवैनम् पाति । विश्वान् देवानयाडिहेत्याह ।

विश्वानेव देवान् भागधेयेन समर्द्धयति ।

स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विनेत्याह ।

अश्विनावेव भागधेयेन समर्द्धयति ।

स्वाहाऽग्नये यज्ञियाय शꣳयजुर्भिरित्याह । अभ्येवैनम् घारयति ।

अथो हविरेवाकः । **70 (10)**

**T.A.8.8.2**

अश्विना घर्मम् पातꣳ हार्दिवान–महर्दिवाभि–रूतिभिरित्याह ।

अश्विनावेव भागधेयेन समर्द्धयति ।

अनु वान् द्यावापृथिवी मꣳसातामित्याहानुमत्यै ।

स्वाहेन्द्राय स्वाहेन्द्रा वडित्याह ।

इन्द्राय हि पुरो हूयते । आश्राव्याह घर्मस्य यजेति ।

वषट्कृते जुहोति । रक्षसामपहत्यै । अनुयजति स्वगाकृत्यै ।

घर्ममपातमश्विनेत्याह । **71 (10)**

**T.A.8.8.3**

पूर्वमेवोदितम् । उत्तरेणाभिगृणाति ।

अनु वान्–द्यावापृथिवी अम(ग्)सातामित्याहानुमत्यै ।

तम् प्राव्यम् ँयथावण्णमो दिवे नमः पृथिव्या इत्याह ।

यथायजुरेवैतत् । दिवि धा इमं ँयज्ञं ँयज्ञमिमम् दिवि धा इत्याह ।

सुवर्गमेवैनम् ँलोकम् गमयति ।

दिवम् गच्छान्तरिक्षम् गच्छ पृथिवीम् गच्छेत्याह ।

एष्वेवैनम् ँलोकेषु प्रतिष्ठापयति । पञ्च प्रदिशो गच्छेत्याह । **72 (10)**

**T.A.8.8.4**

दिक्ष्वेवैनम् प्रतिष्ठापयति ।

देवान् घर्मपान् गच्छ पितॄन् घर्मपान् गच्छेत्याह ।

उभयेष्वेवैनम् प्रतिष्ठापयति । यत् पिन्वते ।

वर्.षुकः पर्जन्यो भवति । तस्मात् पिन्वमानः पुण्यः ।

यत् प्राङ्पिन्वते । तद्–देवानाम् ।

यद्–दक्षिणा । तत्–पितृणाम् । **73 (10)**

**T.A.8.8.5**

यत् प्रत्यक् । तन्–मनुष्याणाम् । यदुदङ्ङ् । तद्–रुद्राणाम् ।

प्राञ्चमुदञ्चम् पिन्वयति । देवत्राऽकः । अथो खलु ।

सर्वा अनु दिशः पिन्वयति । सर्वा दिशः समेधन्ते ।

अन्तःपरिधि पिन्वयति । **74 (10)**

**T.A.8.8.6**

तेजसोऽस्कन्दाय । इषे पीपिह्यूर्जे पीपिहीत्याह ।

इषमेवोर्जं यजमाने दधाति । यजमानाय पीपिहीत्याह ।

यजमानायैवैता–माशिषमाशास्ते । मह्यञ्ज्यैष्ठ्याय पीपिहीत्याह ।

आत्मन एवैतामाशिषमाशास्ते ।

त्विष्यै त्वा द्युम्नाय त्वेन्द्रियाय त्वा भूत्यै त्वेत्याह । यथायजुरेवैतत् ।

धर्माऽसि सुधर्मा मे न्यस्मे ब्रह्माणि धारयेत्याह । **75 (10)**

**T.A.8.8.7**

ब्रह्मन्नेवैनम् प्रतिष्ठापयति । नेत्त्वा वातः स्कन्दयादिति यद्यभिचरेत् ।

अमुष्य त्वा प्राणे सादयाम्यमुना सह निरर्थम् गच्छेति ब्रूयाद्–यम्

द्विष्यात् ।

यमेव द्वेष्टि । तेनैन७ं सह निरर्थम् गमयति ।

पूष्णे शरसे स्वाहेत्याह । या एव देवता हुतभागाः ।

ताभ्य एवैनञ्जुहोति । ग्रावभ्यः स्वाहेत्याह ।

या एवान्तरिक्षे वाचः । **76 (10)**

**T.A.8.8.8**

ताभ्य एवैनञ्जुहोति । प्रतिरेभ्यः स्वाहेत्याह । प्राणा वै देवाः प्रतिराः ।

तेभ्य एवैनञ्जुहोति । द्यावापृथिवीभ्या७ं स्वाहेत्याह ।

द्यावापृथिवीभ्या–मेवैनञ्जुहोति । पितृभ्यो घर्मपेभ्यः स्वाहेत्याह ।

ये वै यज्वानः । ते पितरो घर्मपाः । तेभ्य एवैनञ्जुहोति । **77 (10)**

**T.A.8.8.9**

रुद्राय रुद्रहोत्रे स्वाहेत्याह । रुद्रमेव भागधेयेन समर्द्धयति ।

सर्वतः समनक्ति । सर्वत एव रुद्रन्निरवदयते । उदञ्चन्निरस्यति ।

एषा वै रुद्रस्य दिक् । स्वायामेव दिशि रुद्रन्निरवदयते ।

अप उपस्पृशति मेद्ध्यत्वाय । नान्वीक्षेत । यदन्वीक्षेत । **78 (10)**

**T.A.8.8.10**

चक्षुरस्य प्रमायुक७ स्यात् । तस्मान्नान्वीक्ष्यः ।

अपीपरो माऽह्नो रात्रियै मा पाह्येषा ते अग्ने समित्तया समिद्ध्य

स्वायुर्मे दा वर्चसा माऽञ्जीरित्याह ।

आयुरेवास्मिन् वर्चो दधाति ।

अपीपरो मा रात्रिया अह्नो मा पाह्येषा ते अग्ने समित्तया समिद्ध्य

स्वायुर्मे दा वर्चसा माऽञ्जीरित्याह ।

आयुरेवास्मिन् वर्चो दधाति ।

अग्निर्-ज्योतिर्-ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः

स्वाहेत्याह ।

यथायजुरेवैतत् । ब्रह्मवादिनो वदन्ति ।

होतव्यमग्निहोत्रा(3) न्न होतव्या(3) मिति । **79 (10)**

**T.A.8.8.11**

यद्–यजुषा जुहुयात् । अयथापूर्वमाहुती जुहुयात् । यन्न जुहुयात् ।

अग्निः पराभवेत् । भूः स्वाहेत्येव होतव्यम् । यथापूर्वमाहुती जुहोति ।

नाग्निः पराभवति । हुतꣳ हविर्मधु हविरित्याह । स्वदयत्येवैनम् ।

इन्द्रतमेऽग्नावित्याह । **80 (10)**

**T.A.8.8.12**

प्राणो वा इन्द्रतमोऽग्निः । प्राण एवैनमिन्द्रतमेऽग्नौ जुहोति ।

पिता नोऽसि मा मा हिꣳसीरित्याहाहिꣳसायै ।

अश्याम ते देव घर्म मधुमतो वाजवतः पितुमत इत्याह ।

आशिषमेवैतामाशास्ते ।

स्वधाविनोऽशीमहि त्वा मा मा हिꣳसी–रित्याहाहिꣳसायै ।

तेजसा वा एते व्यृद्ध्यन्ते । ये प्रवर्ग्येण चरन्ति । प्राश्ञन्ति ।

तेज एवात्मन्–दधते । **81 (10)**

**T.A.8.8.13**

सम्ँवथ्सरन्न माꣳसमश्ञीयात् । न रामामुपेयात् । न मृन्मयेन पिबेत् ।

नास्य राम उच्छिष्टम् पिबेत् । तेज एव तथ्सꣳश्यति ।

देवासुराः सम्ँयत्ता आसन्न् । ते देवा विजयमुपयन्तः ।
विभ्राजि सौर्ये ब्रह्म सन्न्यदधत । यत् किञ्च दिवाकीर्त्यम् ।
तदेतेनैव व्रतेनागोपायत् ( ) । तस्मादेतद्-व्रतम् चार्यम् ।
तेजसो गोपीथाय । तस्मादेतानि यजूꣳषि विभ्राजः सौर्यस्येत्याहुः ।
स्वाहा त्वा सूर्यस्य रश्मिभ्य इति प्रातः सꣳसादयति ।
स्वाहा त्वा नक्षत्रेभ्य इति सायम् ।
एता वा एतस्य देवताः । ताभिरेवैनꣳ समर्द्धयति ॥ **82 (17)**

*(अक - रश्मिनेत्याह - प्रदिशो गच्छेत्याह - पितृणा - मन्तः परिधि पिन्वयति - धारयेत्याह - वाचो - धर्मपा स्तेभ्य एवैनम् जुहो - त्यन्वीक्षेत - होतव्या* (3) *मि - त्यग्रावित्याह - दधते - ऽगोपायथ् सप्त च) (A8)*

<u>अनुवाकम् - 9</u>

**<u>T.A.8.9.1</u>**

घर्म या ते दिवि शुगिति तिस्र आहुतीर्-जुहोति ।
छन्दोभिरेवास्यैभ्यो लोकेभ्यः शुचमव यजते । इयत्यग्रे जुहोति ।

अथेयत्यथेयति । त्रय इमे लोकाः ।

एभ्य एव लोकेभ्यः शुचमव यजते ।

अनु नोऽद्यानुमतिरित्याहानुमत्यै । दिवस्त्वा परस्पाया इत्याह ।

दिव एवेमान् ँल्लोकान् दाधार ।

ब्रह्मणस्त्वा परस्पाया इत्याह । **83 (10)**

**T.A.8.9.2**

एष्वेव लोकेषु प्रजा दाधार । प्राणस्य त्वा परस्पाया इत्याह ।

प्रजास्वेव प्राणान् दाधार । शिरो वा एतद्-यज्ञस्य ।

यत् प्रवर्ग्यः । असौ खलु वा आदित्यः प्रवर्ग्यः ।

तं ँयद्-दक्षिणा प्रत्यञ्च-मुदञ्च-मुद्वासयेत् ।

जिह्मं ँयज्ञस्य शिरो हरेत् ।

प्राञ्चमुद्वासयति । पुरस्तादेव यज्ञस्य शिरः प्रतिदधाति । **84 (10)**

**T.A.8.9.3**

प्राञ्चमुद्वासयति । तस्मादसावादित्यः पुरस्तादुदेति ।

शफोपयमान्धवित्राणि धृष्टी इत्यन्ववहरन्ति ।

सात्मानमेवैन९ं सतनुम् करोति । सात्माऽमुष्मिन् ँल्लोके भवति ।

य एवं वेँद । औदुम्बराणि भवन्ति । ऊर्ग्वा उदुम्बरः ।

ऊर्जमेवावरुन्धे । वर्त्मना वा अन्वित्य । **85 (10)**

**T.A.8.9.4**

यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति । साम्ना प्रस्तोताऽन्ववैति ।

साम वै रक्षोहा । रक्षसामपहत्यै । त्रिर्निधनमुपैति । त्रय इमे लोकाः ।

एभ्य एव लोकेभ्यो रक्षाꣳस्यपहन्ति । पुरुषःपुरुषो निधनमुपैति ।

पुरुषःपुरुषो हि रक्षस्वी । रक्षसामपहत्यै । **86 (10)**

**T.A.8.9.5**

यत् पृथिव्यामुद्वासयेत् । पृथिवीꣳ शुचाऽर्पयेत् । यदप्सु ।

अपः शुचार्पयेत् । यदोषधीषु । ओषधीः शुचाऽर्पयेत् ।

यद्–वनस्पतिषु । वनस्पतीञ्छुचाऽर्पयेत् । हिरण्यन्निधायोद्वासयति ।

अमृतं वैँ हिरण्यम् । **87 (10)**

**T.A.8.9.6**

अमृत एवैनम् प्रतिष्ठापयति ।

वल्गुरसि शं युँधाया इति त्रिः परिषिञ्चन्पर्येति । त्रिवृद्वा अग्निः ।

यावानेवाग्निः । तस्य शुचꣳ शमयति । त्रिः पुनः पर्येति ।

षट्थ् सम्पद्यन्ते । षड्वा ऋतवः । ऋतुभिरेवास्य शुचꣳ शमयति ।

चतुः स्रक्तिर्नाभिर्. ऋतस्येत्याह । **88 (10)**

**T.A.8.9.7**

इयं वँवा ऋतम् । तस्या एष एव नाभिः । यत् प्रवर्ग्यः । तस्मादेवमाह ।

सदो विश्वायुरित्याह । सदो हीयम् ।

अप द्वेषो अप ह्वर इत्याह भ्रातृव्यापनुत्त्यै ।

घर्मैतत्तेऽन्नमेतत् पुरीषमिति दद्ध्ना मधुमिश्रेण पूरयति ।

ऊर्ग्वा अन्नाद्यन्दधि । ऊर्जैवैनमन्नाद्येन समर्द्धयति । **89 (10)**

**T.A.8.9.8**

अनशनायुको भवति । य एवं वँवेद ।

रन्तिर्नामासि दिव्यो गन्धर्व इत्याह ।

रूपमेवास्यै–तन्–महिमानꣳ रन्तिम् बन्धुतां वँव्याचष्टे ।

समहमायुषा सम् प्राणेनेत्याह । आशिषमेवैतामाशास्ते ।

व्यसौ योऽस्मान् द्वेष्टि यञ्च वयम् द्विष्म इत्याह ।

अभिचार एवास्यैषः । अचिक्रदद्–वृषा हरिरित्याह ।

वृषा ह्येषः । **90 (10)**

**T.A.8.9.9**

वृषा हरिः । महान्–मित्रो न दर्.शत इत्याह । स्तौत्येवैनमेतत् ।

चिदसि समुद्रयोनिरित्याह । स्वामेवैनं ँयोनिङ्गमयति ।

नमस्ते अस्तु मा मा हि॑ꣳसीरित्याहाहि॑ꣳसायै ।

विश्वावसु॑ꣳ सोमगन्धर्वमित्याह । यदेवास्य क्रियमाणस्यान्तर्यन्ति ।

तदेवास्यैतेना प्यायमति ।

विश्वावसुरभि तन्नो गृणात्वित्याह । **91 (10)**

**T.A.8.9.10**

पूर्वमेवोदितम् । उत्तरेणाभिगृणाति ।

धियो हिन्वानो धिय इन्नो अव्यादित्याह । ऋतूनेवास्मै कल्पयति ।

प्रासाम् गन्धर्वो अमृतानि वोचदित्याह । प्राणा वा अमृताः ।

प्राणानेवास्मै कल्पयति ।

एतत्त्वन्देव घर्म देवो देवानुपागा इत्याह । देवो ह्येष सन्देवानुपैति ।

इदमहम् मनुष्यो मनुष्यानित्याह । **92 (10)**

**T.A.8.9.11**

मनुष्यो हि । एष सन्–मनुष्यानुपैति । ईश्वरो वै प्रवर्ग्यमुद्वासयन्न् ।

प्रजाम् पशून्थ् सोमपीथमनूद्वासः सोमपीथानुमेहि ।

सह प्रजया सह रायस्पोषेणेत्याह ।

प्रजामेव पशून्थ् सोमपीथमात्मन् धत्ते ।

सुमित्रा न आप ओषधयः सन्त्वित्याह । आशिषमेवैतामाशास्ते ।

दुर्मित्रास्तस्मै भूयासुर्–योऽस्मान्–द्वेष्टि यञ्च वयम् द्विष्म इत्याह ।

अभिचार एवास्यैषः ( ) । प्र वा एषोऽस्माल् लोकाच्च्यवते ।

यः प्रवर्ग्यमुद्वासयति ।

उदु त्यम् चित्रमिति सौरीभ्यामृग्भ्याम् पुनरेत्य गार्.हपत्ये जुहोति ।

अयम् ँवै लोको गार्.हपत्यः । अस्मिन्नेव लोके प्रतितिष्ठति ।

असौ खलु वा आदित्यः सुवर्गो लोकः ।

यथ् सौरी भवतः । तेनैव सुवर्गाल् लोकान्नैति ॥ **93 (18)**

*(ब्रह्मणस्त्वा परस्पाया इत्याह - दधा - त्यन्वित्य - रक्षस्वी रक्षसा मपहत्यै - वै हिरण्य - माहा - र्द्धयति - ह्येष - गृणात्वित्याह - मनुष्यानित्याहा - स्यैषो ऽष्टौ च) (A9)*

अनुवाकम् - 10

**T.A.8.10.1**

प्रजापतिं ँवै देवाः शुक्रम् पयोऽदुह्रन् । तदेभ्यो न व्यभवत् ।

तदग्निर्व्यकरोत् । तानि शुक्रियाणि सामान्यभवन् ।

तेषां ँयो रसोऽत्यक्षरत् । तानि शुक्रयजूꣳष्यभवन् ।

शुक्रियाणां ँवा एतानि शुक्रियाणि । सामपयसम्ँवा एतयोरन्यत् ।

देवानामन्यत्पयः । यद्गोः पयः । **94 (10)**

**T.A.8.10.2**

तथ् साम्नः पयः । यदजायै पयः । तद्-देवानाम् पयः ।

तस्माद्-यत्रैतैर्-यजुर्भिश्चरन्ति । तत् पयसा चरन्ति ।

प्रजापतिमेव तद् देवान्पयसाऽन्नाद्येन समर्द्धयन्ति ।

एष ह त्वै साक्षात् प्रवर्ग्यम् भक्षयति ।

यस्यैवं ँविदुषः प्रवर्ग्यः प्रवृज्यते ।

उत्तरवेद्या–मुद्वासयेत्–तेजस्कामस्य ।

तेजो वा उत्तरवेदिः । **95 (10)**

**T.A.8.10.3**

तेजः प्रवर्ग्यः । तेजसैव तेजः समर्द्धयति ।

उत्तरवेद्या–मुद्वासये–दन्नकामस्य । शिरो वा एतद्–यज्ञस्य ।

यत् प्रवर्ग्यः । मुखमुत्तरवेदिः । शीर्ष्णैव मुखꣳ सन्दधात्यन्नाद्याय ।

अन्नाद एव भवति । यत्र खलु वा एतमुद्वासितं ँवयाꣳसि पर्यासते ।

परि वै ताꣳ समाम् प्रजा वयाꣳस्यासते । **96 (10)**

**T.A.8.10.4**

तस्मा–दुत्तरवेद्या–मेवोद्वासयेत् । प्रजानाम् गोपीथाय ।

पुरो वा पश्चाद्वोद्वासयेत् । पुरस्ताद्वा एतज्ज्योतिरुदेति ।

तत् पश्चान्निम्रोचति । स्वामेवैनम् ँयोनिमनूद्वासयति ।

अपाम् मद्ध्य उद्वासयेत् । अपां ँवा एतन्मद्ध्या–ज्ज्योतिरजायत ।

ज्योतिः प्रवर्ग्यः । स्व एवैनं ँयोनौ प्रतिष्ठापयति । **97 (10)**

**T.A.8.10.5**

यम् द्विष्यात् । यत्र स स्यात् । तस्याम् दिश्युद्वासयेत् ।

एष वा अग्निर्-वैश्वानरः । यत्-प्रवर्ग्यः ।

अग्निनैवैनं वैँश्वानरेणाभि प्रवर्तयति ।

औदुम्बर्या॒ं शाखायामुद्वासयेत् ।

ऊर्ग्वा उदुम्बरः । अन्नम् प्राणः । शुग्घर्मः । **98 (10)**

**T.A.8.10.6**

इदमह-ममुष्यामुष्यायणस्य शुचा प्राणमपि दहामीत्याह ।

शुचैवास्य प्राणमपि दहति । ताजगार्तिमार्च्छति ।

यत्र दर्भा उपदीकसन्तताः स्युः । तदुद्वासयेद्-वृष्टिकामस्य ।

एता वा अपामनूज्झावर्यो नाम ।

यद्-दर्भाः । असौ खलु वा आदित्य इतो वृष्टिमुदीरयति ।

असावेवास्मा आदित्यो वृष्टिन्नियच्छति ।

ता आपो नियता धन्वना यन्ति ( ) ॥ **99 (10)** *(गोः पय - उत्तरवेदि - रासते - स्थापयति - घर्मो - यन्ति) (A10)*

अनुवाकम् – 11

**T.A.8.11.1**

प्रजापतिः सम्भ्रियमाणः । सम्राट्थ् सम्भृतः । घर्मः प्रवृक्तः ।

महावीर उद्वासितः । असौ खलु वावैष आदित्यः । यत् प्रवर्ग्यः ।

स एतानि नामान्यकुरुत । य एवं वेद । विदुरेनन्नाम्ना ।

ब्रह्मवादिनो वदन्ति । **100 (10)**

**T.A.8.11.2**

यो वै वसीयाꣳ सम्ँयथानाममुपचरति ।

पुण्यार्तिं वै स तस्मै कामयते । पुण्यार्तिमस्मै कामयन्ते ।

य एवं वेद । तस्मादेवं विद्वान् । घर्म इति दिवाऽऽचक्षीत ।

सम्राडिति नक्तम् । एते वा एतस्य प्रिये तनुवौ ।

एते अस्य प्रिये नामनी । प्रिययैवैनम् तनुवा । **101 (10)**

**T.A.8.11.3**

प्रियेण नाम्ना समर्द्धयति । कीर्तिरस्य पूर्वा गच्छति जनतामायतः ।

गायत्री देवेभ्योऽपाक्रामत् । तान्देवाः प्रवर्ग्येणैवानु व्यभवन्न् ।

प्रवर्ग्येणाप्नुवन्न् । यच्चतुर्विꣳशतिः कृत्वः प्रवर्ग्यम् प्रवृणक्ति ।

गायत्रीमेव तदनु विभवति । गायत्रीमाप्नोति ।

पूर्वाऽस्य जनं यतः कीर्तिर्गच्छति । वैश्वदेवः सꣳसन्नः । **102 (10)**

**T.A.8.11.4**

वसवः प्रवृक्तः । सोमोऽभिकीर्यमाणः । आश्विनः पयस्यानीयमाने ।

मारुतः क्वथन्न् । पौष्ण उदन्तः । सारस्वतो विष्यन्दमानः ।

मैत्रः शरो गृहीतः । तेज उद्यतो वायुः । ह्रियमाणः प्रजापतिः ।

हूयमानो वाग्घुतः । **103 (10)**

**T.A.8.11.5**

असौ खलु वावैष आदित्यः । यत् प्रवर्ग्यः । स एतानि नामान्यकुरुत ।

य एवं वेद । विदुरेनन्नाम्ना । ब्रह्मवादिनो वदन्ति ।

यन्मृन्मय-माहुतिन्नाश्ञुतेऽथ । कस्मादेषोऽश्ञुत इति ।

वागेष इति ब्रूयात् । वाच्येव वाचम् दधाति । **104 (10)**

**T.A.8.11.6**

तस्मादश्ञुते । प्रजापतिर्वा एष द्वादशधा विहितः । यत् प्रवर्ग्यः ।

यत् प्रागवकाशेभ्यः । तेन प्रजा असृजत ।

अवकाशैर्-देवासुरानसृजत । यदूद्ध्र्वमवकाशेभ्यः ।

तेनान्नमसृजत । अन्नम् प्रजापतिः । प्रजापतिर्वावैषः ( ) ॥ **105 (10)**

*(वदन्ति - तनुवा - सꣳसन्नो - हूयमानो वाग्घुतो - दधा - त्येषः (A11)*

अनुवाकम् - 12

**T.A.8.12.1**

सविता भूत्वा प्रथमेऽहन् प्रवृज्यते । तेन कामाꣳ एति ।

यद्-द्वितीयेऽहन्-प्रवृज्यते । अग्निर्-भूत्वा देवानेति ।

यत्-तृतीयेऽहन्-प्रवृज्यते । वायुर्-भूत्वा प्राणानेति ।

यच्चतुर्थेऽहन्-प्रवृज्यते । आदित्यो भूत्वा रश्मीनेति ।

यत् पञ्चमेऽहन्-प्रवृज्यते । चन्द्रमा भूत्वा नक्षत्राण्येति । **106 (10)**

**T.A.8.12.2**

यथ्-षष्ठेऽहन्-प्रवृज्यते । ऋतुर्-भूत्वा सम्ँवथ्सरमेति ।

यथ्-सप्तमेऽहन्-प्रवृज्यते । धाता भूत्वा शक्वरीमेति ।

यदष्टमेऽहन्-प्रवृज्यते । बृहस्पतिर्-भूत्वा गायत्रीमेति ।

यन्-नवमेऽहन्-प्रवृज्यते । मित्रो भूत्वा त्रिवृत इमान् ँल्लोकानेति ।

यद्-दशमेऽहन्-प्रवृज्यते । वरुणो भूत्वा विराजमेति । **107 (10)**

**T.A.8.12.3**

यदेकादशेऽहन्-प्रवृज्यते । इन्द्रो भूत्वा त्रिष्टुभमेति ।

यद्-द्वादशेऽहन्-प्रवृज्यते । सोमो भूत्वा सुत्यामेति ।

यत्-पुरस्तादुपसदाम् प्रवृज्यते ।

तस्मादितः पराङ्मूँ ँल्लोकाꣳस्तपन्नेति ।

यदुपरिष्टा-दुपसदाम् प्रवृज्यते ।

तस्मादमुतोऽर्वाङिमां ँल्लोकाꣳस्तपन्नेति । य एवं ँवेद ।

ऐव तपति ( ) ॥ **108 (10)**

*(नक्षत्राण्येति - विराजमेति - तपति) (A12)*

**Prapaataka Korvai with starting Padams of 1 to 12 Anuvaakams :-**

देवा वै सत्रꣳ - सावित्रम् - परिश्रिते - ब्रह्मन् प्रचरिष्यामो -

ऽग्निष्ट्वा - शिरो ग्रीवा - देवस्य रशनां - ँविश्वा आशा -

धर्म या ते - प्रजापतिꣳ शुक्रम् - प्रजापतिः सम्भ्रियमाणः -

सविता भूत्वा द्वादश)

**Korvai with starting Padams of 1, 11, 21 Series of Dasinis :-**

(देवा वै सत्रꣳ – स खदिरः – परिश्रिते – ऽभिपूर्व – मथो रक्षसाम् – ग्रैष्मावेवास्मै – ब्रह्म वै देवाना – मश्विना घर्मम् पातम् – प्राणो वै – वृषा हरिर् – यो वै वसीयाꣳ सम्ँयथानाम मष्टोत्तरशतम्)

**First and Last Padam in TA, 8th Prapaatakam :-**

(देवा वै सत्र – मैव तपति)

॥ हरिः ओम् ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यके अष्टमः प्रपाठकः समाप्तः ॥

॥ इति तैत्तिरीय यजुरारण्यकम् समाप्तम् ॥

==================

**Details of Dasini&Vaakyams for Prapaatakam No.8 (TA 8)**

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 7 | 77 |
| Anuvakam 2 | 13 | 138 |
| Anuvakam 3 | 9 | 98 |
| Anuvakam 4 | 13 | 132 |
| Anuvakam 5 | 3 | 38 |

| | | |
|---|---|---|
| Anuvakam 6 | 12 | 124 |
| Anuvakam 7 | 12 | 124 |
| Anuvakam 8 | 13 | 137 |
| Anuvakam 9 | 11 | 118 |
| Anuvakam 10 | 6 | 60 |
| Anuvakam 11 | 6 | 60 |
| Anuvakam 12 | 3 | 30 |
| Total → | 108 | 1136 |

## For Full Aranyakam

| | Anuvaakam | Dasini | Vaakyam |
|---|---|---|---|
| Prapaatakam1 | 32 | 130 | 1396 |
| Prapaatakam2 | 20 | 20 | 117 |
| Prapaatakam3 | 21 | 53 | 501 |
| Prapaatakam4 | 12 | 27 | 280 |
| Prapaatakam5 | 15 | 44 | 634 |
| Prapaatakam6 | 80 | 101 | 579 |
| Prapaatakam7 | 42 | 94 | 840 |
| Prapaatakam8 | 12 | 108 | 1136 |
| Total → | 234 | 577 | 5483 |